निश्चलकर कहते हैं कि यह श्लोक चक्रपाणिदत्त ने अपने ग्रन्थ में 'योगशत' से लिया है। श्लोक में पठित 'पुष्कराह्वय' शब्द का अर्थ 'पुष्करमूल' है। जिस ज्वर में पार्श्वरुजा (बगल में पीड़ा) होती है, वह ज्वर 'पार्श्वरुक्कर' विशेषण से कहा गया है, उसमें यह योग हितकर है। ऐसा ही योग 'आयुर्वेदसार' में भी आया है। तदनुसार- पुष्करमूल, गिलोय, सोंठ एवं बृहती (कण्टकारी) के साथ अच्छी

---

४. ०प्रभवे प्रशस्यते- इ., ०प्रभवे च शस्यते- क., ०प्रभवेऽपि शस्यते- ति.१

प्रकार उबालकर तैयार किया गया जल अर्थात् काढ़ा पार्श्व भागों में पीड़ा करने वाले कफवातप्रधान ज्वर को हर लेता है।

आरग्वधादि क्वाथ (योग सं.- ५)

आरग्वधग्रन्थिकमुस्ततिक्ता-
हरीतकीभि: क्वथित: कषाय:।
सामे सशूले कफवातयुक्ते
ज्वरे हितो दीपनपाचनश्च।।५।।

आरग्वध (अमलतास), ग्रन्थिक (पिप्पलीमूल), मुस्ता (मोथा), तिक्ता (कुटकी) एवं हरीतकी (हरड़) द्वारा तैयार किया गया क्वाथ आम सहित शूल के साथ होने वाले कफवातप्रधान ज्वर में हितकर होता है। यह क्वाथ जठराग्नि-दीपन एवं आम (अपक्व आहार रस) का पाचन करने वाला होता है। यह योग '**आरोग्यपञ्चक**' नाम से वैद्यों में प्रसिद्ध है, ऐसा '**योगशत-वैद्यवल्लभा**' के रचयिता **वैद्यवर रूपनयन** का कथन है।

यह श्लोक भी '**चक्रदत्त**' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

आरग्वधेत्यादि **योगशतस्य**। आरग्वधं सुवर्णालुफलम् अनुलोमकत्वात्, एवं सर्वत्र। ग्रन्थिकं पिप्पलीमूलं (तिक्ता तिक्तकरोहिणी) दीपनभेदनश्चेत्यपि पाठ:, तथा च **बिन्दुसार**:-

शम्याक-कटुका-पथ्या-मुस्तक-ग्रन्थिकै: पिबेत्।
कफवातज्वरे क्वाथं सशूले च प्रभेदनम्।। इति।

(चक्रदत्त-रत्नप्रभा, ज्वरचिकित्सा-१४१, पृ. ६२)

---

५. दीपनपाचनश्च- रू., दीपनभेदनश्च- निश्चलकर-सूचितं पाठान्तरम्।

(चक्रदत्त-रत्नप्रभा, ज्वरचिकित्सा-१४१, पृ. ६२)

द्राक्षाभयादि क्वाथ (योग सं.- ६)

द्राक्षाभयापर्प्पटकाब्दतिक्ता-
क्वाथं सशम्याकफलं विदध्यात्।
प्रलापमूर्च्छाभ्रमदाहशोष-
तृष्णान्विते पित्तभवे ज्वरे च।।६।।

द्राक्षा (दाख/मुनक्का), अभया (हरड़), पर्पट (पित्तपापड़ा), अब्द (मुस्ता/मोथा), तिक्ता (कुटकी) एवं शम्याक फल (अमलतास की फली) का क्वाथ बनाकर पीना चाहिए। इससे प्रलाप, मूर्च्छा, भ्रम, दाह, शोष एवं तृष्णा (अति प्यास) से युक्त पित्तज्वर शान्त हो जाता है।

यह श्लोक भी '**चक्रदत्त**' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

द्राक्षेत्याद्य**मितप्रभस्य**। अभया हरीतकी, अब्दो मुस्तकम्, तिक्ता कटुरोहिणी, शम्याकफलमारग्वधफलम्, अस्य मज्जभागप्रक्षेप इति **चक्रदत्तः**। अयं पक्षः प्रचारी। अन्ये पुनस्तत्फलैः सह मिलित्वा क्वाथ इत्याहुः।

(चक्रदत्त-रत्नप्रभा, ज्वरचिकित्सा- ९०, पृ.- ५०)

'चक्रदत्त' में 'द्राक्षाभया०' इस श्लोक के अनन्तर ज्वर में होने वाली जलन/अन्तर्दाह को दूर करने के लिए एक अन्य योग अमितप्रभ के नाम से दिया है-

व्युषितं धान्याकजलं प्रातः पीतं सशर्करं पुंसाम्।
अन्तर्दाहं शमयत्यचिराद् दूरप्ररूढमपि।।

व्युषितमित्यादि ख्यातं तस्यैव।

धनिए को कूटकर रात को पानी में डाल दें। प्रातः इसके जल को शर्करा मिलाकर पिएं। यह चिरकाल से बढ़े हुए अन्तर्दाह (अन्दर की जलन) को शान्त कर देता है।

६. द्राक्षामृता- क., द्राक्षाभया- आ., च-र., ज., भो. १,३,५,

टिप्पणी- यह योग 'योगशत' में नहीं है, अमितप्रभ की अन्य रचना- 'चिकित्सातिशय' में यह योग रहा होगा। इस ग्रन्थ का अन्वेषण अपेक्षित है।

निदिग्धिकादि क्वाथ (योग सं.- ७)

निदिग्धिकानागरकामृतानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम्।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्दितपीनसेषु।।७।।

निदिग्धिका (कण्टकारी/कटेरी), नागरक (सोंठ) एवं अमृता (गिलोय) का क्वाथ बनाएं। इसे पिप्पली का चूर्ण (चार माशा) मिलाकर पीना चाहिए। यह जीर्णज्वर, अरोचक, कास, शूल, श्वास, अग्निमान्द्य (मन्दाग्नि), अर्दित (मुख का लकवा) एवं पीनस (नजला) रोग को दूर कर देता है।

यह श्लोक भी '**चक्रदत्त**' में 'योगशत' से उद्धृत किया गया है। वहां इस पर 'चक्रदत्त-रत्नप्रभाकार' निश्चलकर की व्याख्या निम्न प्रकार से है-

निदिग्धिकेत्यादि ख्यातं **योगशतस्य**। निदिग्धिका कण्टकारिका। वातकफे क्रियते, पित्तानुबलेऽपि पिप्पलीं त्यक्त्वा मधु प्रक्षिपन्ति वृद्धाः। पुराणप्रतिश्यायेऽप्ययं योगो दृष्टफलः। अस्य सोपपत्तिकं (वैद्य)व्यवहारसिद्धप्रयोगकालं **वृन्दकुण्डोक्तं चक्रपाणिराह-** हन्तीत्यादि*। प्रातः समयेऽपि बोध्यः, यदुक्तं **बिन्दुसारे**–

निदिग्धिकामृताभ्यां तु शुण्ठ्या च सह साधितम्।
क्वाथं जीर्णज्वरार्त्तस्तु पिप्पलीचूर्णमिश्रितम्।।
श्वासकासविनाशाय मन्दाग्नेर्दीपनाय च।
अरुचेश्च निवृत्त्यर्थं प्रातरुत्थाय तं पिबेत्।। इति

(चक्रदत्त-रत्नप्रभा, ज्वरचिकित्सा- २००, पृ. ८३)

७. तोयं पिबे- इ., क्वाथं पिबे- ति.,

*. हन्त्यूर्ध्वगामयं प्रायः सायं तेनोपयुज्यते (चक्रदत्त-ज्वरचिकित्सा- २००)

दुरालभादि क्वाथ (योग सं.- ८)

दुरालभापर्प्पटकप्रियङ्गु-
भूनिम्बवासाकटुरोहिणीनाम्।
क्वाथं पिबेच्छर्करयावगाढं
तृष्णास्त्रपित्तज्वरदाहयुक्तः।।८।।

दुरालभा (धमासा), पर्प्पट (पित्तपापड़ा), प्रियंगु, भूनिम्ब (चिरायता), वासा (अडूसा) एवं कटुरोहिणी (कुटकी) के क्वाथ में शर्करा डालकर पीने से तृष्णा (अति प्यास), रक्तपित्त, ज्वर एवं दाह नष्ट हो जाते हैं। इसमें शर्करा इतनी मात्रा में डालें कि पीने में मीठा लगे। शर्करा-विषयक यह भाव श्लोकगत 'शर्करायावगाढम्' पद से प्रकट होता है। यहाँ ज्वर-चिकित्सा के साथ तृष्णाहर एवं रक्तपित्त-नाशक योग रखा है; क्योंकि ज्वर के कारण तृष्णा व रक्तपित्त भी उत्पन्न होते हैं।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

दुरालभेत्याद्य**मितप्रभस्य**। प्रियङ्गु प्रियङ्गुफलम्। भूनिम्बः किराततिक्तम्। शर्करयाऽवगाढमिति पूर्वप्रक्षेपविधिनैव, छन्दोऽनुरोधादवगाढशब्द इत्येके, व्यक्तमाधुर्यार्थमिति **चक्रः**। केचिद् दुरालभादीनामापोथितानां (निशास्थितानां जलं) शर्करामधुरं पिबेदित्याहुः। तृष्णादिभिर्व्यस्तैः समस्तैर्वा (युक्तम्) इति **वल्लभा**। प्राधान्याद् रक्तपित्त(ज्वर)हन्तृत्वं बोध्यम्, यदुक्तं **रविगुप्ते**-

तिक्तायासकभूनिम्बश्यामापर्पटवासकैः।
शृतं जलं सितायुक्तं रक्तपित्तज्वरं जयेत्।। इति। (सिद्ध.सं. ५.३४)

अत्र श्यामा प्रियङ्गुः। (चक्रदत्त-रत्नप्रभा, ज्वरचिकित्सा- ८४, पृ. ४८)

प्रमेह-चिकित्सा-

फलत्रिकादि क्वाथ (योग सं.- ९)

फलत्रिकं दारुनिशां विशालां
मुस्ताञ्च निष्क्वाथ्य निशांशकल्कम्।
पिबेत् कषायं मधुसम्प्रयुक्तं
सर्वप्रमेहेषु समुत्थितेषु।।९।। (चरक. चि.- ६.४०)

सभी प्रकार के प्रमेह रोगों के उभरने पर इस योग का सेवन करें- त्रिफला, दारुहल्दी, विशाला (इन्द्रवारुणी/इन्द्रायण), मुस्ता (मोथा)- इनका क्वाथ बनाकर पुनः उसमें हल्दी का कल्क अंशतः मिलाकर कषाय (क्वाथ) तैयार करें। कुछ शीतल होने पर इसमें थोड़ा मधु मिलाकर पान करें। इससे सभी प्रकार के प्रमेह नष्ट हो जाते हैं। यह योग वैद्यों में 'फलत्रिकादि क्वाथ' के नाम से प्रसिद्ध है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

फलेत्यादि **योगशतस्य**। दारुनिशा दारुहरिद्रेति **कर्ममाला वल्लभा च,** अन्ये तु हरिद्राद्वयमाहुः- दारु दारुहरिद्रा, निशा हरिद्रेत्यर्थः। तत्र पूर्वव्याख्यैव युक्ता, एकपदेनाकल्पनीयत्वात्। निशांशकल्कमिति- एषां समुदितानां फलत्रिकादीनामेको भागः, अंशशब्दोऽर्धाभिधायी, निशाया अर्धभागः कल्को यस्मिन् कषाये तत्तथा। किं वा, अंशश्चतुर्थो भाग इति **कर्ममाला। वल्लभा** तु- निशायाः क्वाथद्रव्यमध्यप्रविष्टायाः दारुहरिद्राया एवांशश्चतुर्थो भाग इति।

(चक्रदत्त-रत्नप्रभा, प्रमेह चिकित्सा-१७, पृ.५१४)

---

९. मुस्तां च- इ., मुस्तं च- च-र., ति., समुच्छ्रितेषु- क., समुत्थितेषु- इ., ति.।

अतिसार-चिकित्सा-

वत्सकादि क्वाथ (योग सं.- १०)

सवत्सकः सातिविषः सबिल्वः
सोदीच्यमुस्तश्च कृतः कषायः।
सामे सशूले च सशोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे।।१०।।

वत्सक (कुटज की छाल), अतिविषा (अतीस), बिल्व (कच्चा बिल्व फल), उदीच्य (सुगन्धबाला) एवं मुस्ता (मोथा) के द्वारा तैयार किया हुआ कषाय (क्वाथ) आम (आंव) सहित अतिसार (दस्त) में, शूल एवं रक्तसहित अतिसार तथा पुराने अतिसार में अत्यन्त हितकर होता है। यह योग 'वत्सकादि क्वाथ' के रूप में प्रसिद्ध है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

सवत्सक इत्यादि **योगशतस्य**। वत्सकः कुटजस्तस्य त्वगिति **चन्द्रकलाटीका वैद्यप्रसारकश्च**। (कुटजस्य) फलं वर्णयति **कर्ममालाटीकादौ**, यदुक्तं **सुश्रुते**-

बिल्व-शक्रयवाम्भोद-बालकातिविषाकृतः।
कषायो हन्त्यतीसारं सामं पित्तसमुद्भवम्।। इति।

प्रायो व्यवहारश्च (त्वचा) फलेनापि (किन्तु) ज्वररक्तप्राधान्ये च (इन्द्रयव उक्तः) यदुक्तम्-

कुटजः कफपित्तास्रत्वग्दोषार्शोऽतिसारजित्।
तद्बीजं रक्तपित्तातीसारज्वरहरं परम्।। इति।।

(चक्रदत्त-रत्नप्रभा, अतीसारचिकित्सा-६४, पृ. १३३)

१०. ०मुस्तैश्च- इ., ०मुस्तश्च- ति., च-र., सशूले च सशोणिते च- इ., सशूले सहशोणिते च- ति., च-र। चिरप्रवृत्ते विहितो- इ., चिरप्रवृत्तेऽपि हितो- च-र.।

निश्चलकर कहते हैं कि यह श्लोक 'योगशत' से लिया गया है। यहाँ वत्सक का अर्थ 'कुटज' है। इस योग में कुटज की छाल लेनी चाहिए, ऐसा 'योगशत' की 'चन्द्रकला' टीका एवं 'वैद्यप्रसारक' ग्रन्थ का मत है। 'योगशत' की 'कर्ममालाटीका' आदि में कुटज के फल का ग्रहण माना है। जैसा कि सुश्रुत में भी कहा है- बिल्व, इन्द्रयव, अम्भोद (मुस्ता), बालक (उदीच्य) एवं अतिविषा (अतीस) के द्वारा बनाया गया कषाय (क्वाथ) आम सहित पित्तजन्य अतिसार (दस्त) को नष्ट कर देता है। प्राय: कुटज की छाल एवं फल इन दोनों का ही व्यवहार देखने में आता है, किन्तु ज्वररक्त की प्रधानता में इन्द्रयव भी ग्राह्य होता है। जैसा कि कहा है- कुटज (इन्द्रजौ), कफ, पित्तरक्त, त्वचा-विकार, अर्शरोग एवं अतीसार को नष्ट कर देता है। कुटज का बीज रक्तपित्त, अतीसार एवं ज्वर को दूर करने में अति उत्तम माना जाता है।

आमयुक्त ग्रहणीरोग की चिकित्सा-

शुण्ठ्यादि क्वाथ/चातुर्भद्रक (योग सं.- ११)

शुण्ठीं समुस्तातिविषां गुडूचीं
पिबेज्जलेन क्वथितां समांशाम्।
मन्दानलत्वे सततामताया-
मामानुबन्धे ग्रहणीगदे च।।११।।

शुण्ठी (सोंठ), मुस्ता (मोथा), अतिविषा (अतीस) एवं गुडूची (गिलोय)- इन सबको समान मात्रा में लेकर क्वाथ बनाकर पान करें। यह मन्दाग्नि, निरन्तर रहने वाले आम (आंव) एवं आम सहित ग्रहणीरोग में अत्यन्त हितकर होता है। यह योग वैद्यों में 'चातुर्भद्रक' नाम से भी प्रसिद्ध है।

---

११. समुस्तातिविषां गुडूचीं- च-र., समुस्ताविषागुडूचीं- ति., इ.। समांशम्- ति., समांशाम्- इ.। उत्तरार्द्धभाग:- इ. पुस्तके इत्थं दृश्यते- 'मन्दानलत्वे सततामये च ज्वरानुसक्ते ग्रहणीगदे च'।। 'मन्दानलत्वे सततामदोषे समानुबन्धे ग्रहणीगदेषु'- भो. ६,

यह श्लोक मूलतः 'चरकसंहिता' का है वहीं से 'योगशत' एवं 'चक्रदत्त' में उद्धृत किया गया है। चक्रदत्त-रत्नप्रभाकार निश्चलकर इसकी व्याख्या निम्न प्रकार से करते हैं-

शुण्ठीमित्यादि **चरकस्य**। सततामतायाम् (आमकोष्ठतायाम्) आमानुबन्धे इति पाठे ग्रहणीगदविशेषणम्। अत एवामानुषक्तम् इति **वैद्यप्रदीपे** पठ्यते। गुडूचीमिति विच्छेदपाठे तां विनापि, यदुक्तं **योगयुक्तौ–**

बिल्वघनातिविषामृतवल्ली क्वाथमथोऽमृतवल्लिविहीनम्।
यः पिबति ग्रहणीव्यथयार्त्तस्तस्य न सा भवति ग्रहणीरुक्।। इति।

तथात्रैव वक्ष्यति–'विश्वघनातिविषामुस्तक्वाथः स्यादामपाचनः' इति।

(चक्रदत्त-रत्नप्रभा, ग्रहणीचिकित्सा- ७, पृ. १४४)

शोफ-चिकित्सा-

पुनर्नवादि क्वाथ (योग सं.- १२)

पुनर्नवादार्वभयागुडूचीः
पिबेत् समूत्रा महिषाक्षयुक्ताः।
त्वग्दोषशोफोदरपाण्डुरोग-
स्थौल्यप्रसेकोर्ध्वकफामयेषु।।१२।।

पुनर्नवा, दारु (देवदारु की छाल), अभया (हरड़), गुडूची (गिलोय) एवं महिषाक्ष (गुग्गुलु)- इन सबका क्वाथ बनाकर दो पल गोमूत्र मिलाकर पान करें। इससे त्वग्दोष (त्वचा के विकार), शोफ (सूजन), उदररोग, पाण्डुरोग, स्थौल्य (मोटापा), प्रसेक (लार टपकना) एवं ऊर्ध्वजत्रु अर्थात् गले एवं उसके ऊपर के भाग में होने वाले कफरोग नष्ट हो जाते हैं। कुछ व्याख्याकार यहां क्वाथ के स्थान पर पुनर्नवा आदि के चूर्ण का गोमूत्र के

१२. पुनर्नवां दार्व्यभयागुडूचीं पिबेत् समूत्रां महिषाक्षयुक्ताम्- इति इ. पुस्तके पाठः। उपरिगतः पाठस्तु ति.मातृकानुसारी।

साथ विधान मानते हैं। मूत्र के विधान-स्थल में गाय का मूत्र ही लिया जाता है, बछड़े या बैल का नहीं, ऐसा निर्णय इस श्लोक की आगे उद्धृत रत्नप्रभा टीका में किया है। ग्रहणीरोग-ग्रस्त व्यक्ति प्रायः शोफयुक्त होता है, अतः ग्रहणी के अनन्तर यहां शोफ-चिकित्सा का विधान किया गया है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

पुनर्नवेत्यादि **योगशतस्य।** पुनर्नवादीनां चूर्णं बोध्यम्, तथा **चागमः**- गोमूत्रेणामरदारुवर्षाभूचेतकीरजः। पिबेद् गुग्गुलुसंयुक्तं शोथोदरविनाशनम्।। इति। गोमूत्रन्तु पलद्वयं ग्राह्यम्-

सामान्येन यत्रोक्ता सा मात्रा मूत्रस्य पानतः।
अत्राग्निकोष्ठमाशङ्क्य पलद्वयं विधीयते।। इति।

स्त्रीगवीमूत्रं गृह्यते, तीक्ष्णत्वात्, लघुत्वाच्च। ननु कथमस्य तीक्ष्णत्वं लघुत्वञ्च? स्त्रीगव्याः पित्तात्मकत्वात्, यदुक्तं-'पित्तात्मिकाः स्त्रियो यस्मात् सौम्यास्तु पुरुषाः स्मृताः' इति, 'तथा चतुष्पदाः (नां) तु स्त्रियो लघुतराः स्मृताः' इति। 'घृतसैन्धवहिङ्गुभ्यां वार्षे बास्ते चतुर्गुणे' **इति**- अत्र च 'वार्ष' इति जातिपरं कृत्वा स्त्रीगवीमूत्रमेव तीक्ष्णत्वात् (लघुत्वाच्च) स्मृतिशास्त्रोक्तमेध्यत्वाच्चेति **वाप्यचन्द्रः।** अत्र त्वन्ये पुंल्लिङ्गनिर्देशादेव नेच्छन्ति, इच्छन्ति च गोमूत्रमात्रश्रुताविति, युक्तमिदं, स्त्रीगवीनां मूत्रे (लाघवं) गौरवञ्च शुक्रावयवसंयोगात्। नपुंसकानाममाङ्गल्यान्न तदादेयमिति **भट्टारपादा** अपि। स्त्रीजातेरपि शुक्रावयवसमवायाद् गौरवमस्तीति मत्वा द्वयोरपि ग्रहणमाह **विष्णुवर्मा।** ऐतिह्याद् याज्ञिकानां व्यवहारात् स्त्रीजातीनामिति **चन्द्रिकाकारः।** **विष्णुवर्मणस्तु** पक्षो न प्रमाणमर्हतीति, स्त्रीमूत्राणां स्वत एव लाघवात्। तज्जातञ्च तद्वत् प्रायः कारणार्थाभिप्रायित्वात् कार्यस्य सहजसिद्धञ्च लाघवम्, यदाह **चरकाचार्यः**- 'गौरवं लिङ्गसामान्ये पुंसां स्त्रीणान्तु लाघवम्' इति। **सुश्रुताचार्योऽपि**- 'स्त्रियश्चतुष्पादेषु विहगेषु च' इति।

(चक्रदत्त-रत्नप्रभा, उदरचिकित्सा- ५१, पृ.-४५२)

कृमिरोग-चिकित्सा

मुस्तादि क्वाथ (योग सं.- १३)

मुस्ताखुपर्णीफलदारुशिग्रु-
क्वाथः सकृष्णाकृमिशत्रुकल्कः।
मार्गद्वयेनापि चिरप्रवृत्तान्
कृमीन्निहन्यात् कृमिजांश्च रोगान्।।१३।।

मुस्ता (मोथा), आखुपर्णी (मूषाकानी), फल (त्रिफला), दारु (दारुहल्दी) एवं शिग्रु (सहिजन) का क्वाथ बनाएं। इसमें उचित मात्रा में कृष्णा (पिप्पली) एवं कृमिशत्रु (विडंग) का कल्क मिलाएं। इस प्रकार तैयार किया गया यह योग मुख एवं मलद्वार अथवा बाह्य एवं आभ्यन्तर- इन दोनों मार्गों में चिरकाल से बढ़े हुए कृमियों एवं कृमिजन्य अन्य रोगों को नष्ट कर देता है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

मुस्ताखुपर्णीत्यादि **ख्यातममितप्रभस्य**। आखुपर्णी मूषकपर्णीति (**वल्लभा**), दन्ती (भेद इत्यर्थः), द्रवन्तीत्यन्ये। फलं मदनफलमिति केचित्, तन्न, यदाह **रविगुप्तः**-

शिग्रुदार्व्याखुपर्ण्यब्दत्रिफलाभिः शृतं जलम्।
कृष्णाविडङ्गकल्काढ्यं पिबेत् क्रिमिनिवारणम्।। इति।

(सिद्ध. सं- ६.७६)

तस्मात् फलं त्रिफला, क्रिमिशत्रुर्विडङ्गसारः। क्रिमिजान् रोगान् क्रिमिजनितदोष-कोपोद्भवान्, ते च रोगाः ज्वरादयः एव, यदाह **रविगुप्तः**-

ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम्।। इति।(सिद्ध.सं.-६.७४)

(चक्रदत्त-रत्नप्रभा, क्रिमिचिकित्सा-४, पृ. २१८)

---

१३. निहन्ति- इ., निहन्यात्- ति.।

अश्मरी, मूत्रकृच्छ्र चिकित्सा-

एलोपकुल्यादि क्वाथ (योग सं.- १४)

एलोपकुल्यामधुकाश्मभेद-
कौन्तीश्वदंष्ट्रावृषकोरुबूकैः।
क्वाथं पिबेदश्मजतुप्रधानं
सशर्करे साश्मरिमूत्रकृच्छ्रे।।१४।।

एला (छोटी इलायची), उपकुल्या (पिप्पली), मधुक (मुलेठी) अश्मभेद (पाषाणभेद/पत्थरचट्टा), कौन्ती (रेणुका/ निर्गुण्डीबीज), श्वदंष्ट्रा (गोखरू), वृषक (वासा/अड़ूसा), उरुबूक (एरण्डबीज)- इनसे सिद्ध किए क्वाथ में शिलाजीत मिलाकर पीने से अश्मरी (पथरी) एवं शर्करा (छोटे टुकड़ों) से युक्त मूत्रकृच्छ्र रोग नष्ट हो जाता है। अश्मरी (पथरी) जब वात के प्रभाव से छोटे-छोटे टुकड़ों में विभक्त हो जाती है, तब उसे शर्करा कहते हैं।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

एलेत्यादि **योगशतस्य**। उपकुल्या पिप्पली, कौन्ती रेणुका, वृषो वासकः। प्रगाढमिति अवश्यप्रक्षेपार्थः, तद्योगात् परमुत्कृष्टशक्तीदं, नान्यथेति तात्पर्यार्थः। अन्यत्रोन्मिश्र इत्येतावन्मात्रोक्तः, तथा **चायुर्वेदसारः**-

एलोरुबुकणायष्टीकण्टीकौन्त्यश्मभिद्वृषैः।
क्वाथः शिलाजतून्मिश्रोऽश्मरीसकृच्छ्रजिद् भवेत्।। इति।

अयं योगो वासामन्तरेणापि, यदुक्तं, **रविगुप्ते**–

श्वदंष्ट्रैरण्डकौन्त्येलायष्टीकृच्छ्राश्मभेदिनी।
क्वाथेनाश्मजतु क्षिप्रं शर्कराश्मरिबन्धजित्।। इति।

(चक्रदत्त-रत्नप्रभा-अश्मरीचिकित्सा- ३२, पृ.५०५)

एलाश्मभेदकादि क्वाथ (योग सं.- १५)

एलाश्मभेदकशिलाजतुपिप्पलीनां
चूर्णानि तण्डुलजले लुलितानि पीत्वा।
यद्वा गुडेन सहितान्यवलिह्य सम्यग्-
आसन्नमृत्युरपि जीवति मूत्रकृच्छ्री।।१५।।

एला (छोटी इलायची), अश्मभेदक (पाषाणभेदक/पत्थरचट्टा), शिलाजीत एवं पिप्पली- इनका चूर्ण तण्डुल-जल में घोलकर पीने से अथवा उक्त ओषधियों के चूर्ण को गुड़ के साथ चाटने से आसन्नमृत्यु (जिसकी मौत निकट ही है, ऐसा) मूत्रकृच्छ्री (मूत्रकृच्छ्र रोग से ग्रस्त) व्यक्ति भी जीवन पा लेता है- अर्थात् शीघ्र ही स्वास्थ्यलाभ कर लेता है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। अत एव वहां चक्रदत्तरत्नप्रभाकार निश्चलकर कहते हैं- **एलेत्यादि ख्यातं योगशतस्य।** (चक्रदत्त-रत्नप्रभा, मूत्रकृच्छ्रचिकित्सा- २४, पृ.४९४)

टिप्पणी- यह पद्य इस संस्करण के लिए आधारभूत मातृकाओं में निर्धारित हस्तलिपि ति. मातृका में अनुपलब्ध है, किन्तु पाण्डिचेरी-संस्करण में यह उपलब्ध है तथा चक्रदत्त-रत्नप्रभा में भी इसे योगशत का पद्य बताया है। अतः इसे प्रस्तुत संस्करण में रखा गया है।

हरीतक्यादि क्वाथ (योग सं.- १६)

हरीतकी-गोक्षुर-राजवृक्ष-
पाषाणभिद्धन्वयवासकानाम्।
क्वाथं पिबेन्माक्षिकसम्प्रयुक्तं
कृच्छ्रे सदाहे सरुजे विबन्धे।।१६।।

हरीतकी (हरड़), गोक्षुर (गोखरू), राजवृक्ष (अमलतास), पाषाणभिद् (अश्मभेदक/पत्थरचट्टा), धन्वयवास (दुरालभा/धमासा)- इनका क्वाथ

बनाएं। शीतल होने पर इसमें उचित मात्रा में मधु मिलाकर पान करें। इससे दाह (जलन) एवं पीड़ासहित मूत्रकृच्छ्र (कष्टपूर्वक मूत्र उतरना) तथा विबन्ध (मूत्र की रुकावट) नष्ट हो जाते हैं।

यह श्लोक भी चक्रपाणिदत्त ने अपने ग्रन्थ '**चक्रदत्त**' में उद्धृत किया है। 'चक्रदत्त' के व्याख्याकार निश्चलकर इसकी व्याख्या निम्न प्रकार से करते हैं-

हरीतकीत्यादि **योगशतस्य**। राजवृक्षः स्वर्णाहुलिस्तस्य फलम्। पाषाणभित् पाषाणभेदी। (चक्रदत्त-रत्नप्रभा, मूत्रकृच्छ्रचिकित्सा-७, पृ.- ४९१)

वात-रक्तचिकित्सा

वासागुडूच्यादि कषाय (योग सं.- १७)

वासा-गुडूची-चतुरङ्गुलाना-
मैरण्डतैलेन पिबन् कषायम्।
क्रमेण सर्वाङ्गजमप्यशेषं
जयेदसृग्वातभवं विकारम्।।१७।।

वासा (अडूसा), गुडूची (गिलोय) एवं चतुरङ्गुल (अमलतास की फली) के क्वाथ को उचित मात्रा में एरण्ड-तैल मिलाकर पीने से क्रमशः सभी अङ्गों में विद्यमान असृग्वात (वातरक्त) रोग पूर्ण रूप से नष्ट हो जाता है। 'चक्रदत्त-रत्नप्रभा' में क्वाथ से एरण्ड तैल की मात्रा द्विगुण बताई गई है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

वासेत्यादि ख्यातं **योगशतस्य** । चतुरङ्गुलस्य फलं द्विगुणञ्चैरण्डतैलम्-

अमरामृगपतिवदनं नरपतिवदनस्य सङ्गतं क्वथितम्।
द्विगुणारितैलमिश्रं शमयति वातासृजं घोरम्।। इति।।

परमत्र क्वाथमपेक्ष्य रुबुतैलं तद्द्विगुणम्, न त्वेकक्वाथ्यद्रव्यमपेक्ष्येत्याहुः, युक्तञ्चेदम्, अन्यत्रापि विशेषानभिधानात्। यदुक्तम**मृतमालायाम्**-

शम्याकामृतवासानामेरण्डस्नेहसंयुतम्।
पीत्वा क्वाथमसृग्वातं क्रमात् सर्वाङ्गजं जयेत्।। इति।।

(चक्रदत्त-रत्नप्रभा, वातरक्तचिकित्सा- ६, पृ. ४१०)

असृग्दर, श्वास चिकित्सा-

रसाञ्जनादि योग, भार्गी योग (योग सं.- १८-१९)

रसाञ्जनं तन्दुलकस्य मूलं
क्षौद्रान्वितं तण्डुलतोयपीतम्।
असृग्दरं सर्वभवं निहन्ति
श्वासं च भार्गी सह नागरेण।।१८।।

रसाञ्जन एवं तन्दुलकमूल (चौलाई की जड़) को पीसकर तण्डुल-जल (चावल के धोवन) के साथ मधु मिलाकर पान करें। यह योग सब प्रकार के असृग्दर अर्थात् स्त्रियों के रक्तप्रदर रोग को नष्ट कर देता है। इसी प्रकार नागर (शुण्ठी) के साथ भार्गी (भारंगी) का सेवन करने से सभी प्रकार का श्वास रोग नष्ट हो जाता है।

एरण्डादि कषाय/एरण्ड सप्तक योग (योग सं.- २०)

एरण्ड-बिल्व-बृहतीद्वय-मातुलुङ्ग-
पाषाणभित्त्रिकटमूलकृतः कषायः।
सक्षारहिङ्गुलवणोरुबुतैलमिश्रः
श्रोण्यंस-मेढ्र-हृदय-स्तनरुक्षु पेयः।।१९।।

एरण्ड, बिल्व, दोनों प्रकार की बृहती (कण्टकारी)- छोटी व बड़ी, मातुलुङ्ग (निम्बू), पाषाणभिद् (अश्मभेदक/ पत्थरचट्टा) एवं त्रिकट/

---

१९. मातुलिङ्गः- ति., मातुलुङ्ग- इ., च-र.। श्रोण्यूरु.- इ., ति., श्रोण्यंस.- च-र., भो. ६।

त्रिकण्ट/गोखरू के मूल का क्वाथ बनाएं। इसमें उचित मात्रा में यवक्षार, हिङ्गु (भुनी हींग) एवं सैन्धव लवण मिलाएं; तदनन्तर इसमें उरुबुतैल (एरण्डतैल) मिलाकर पान करें। इससे कमर, कंधा, लिंग, हृदय एवं स्तनों के रोग नष्ट हो जाते हैं।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

एरण्डेत्यादि **योगशतस्य**। पाषाणभित् पाषाणभेदी, त्रिकण्टः गोक्षुरकः, अत्र यौगिकत्वात्। लवणं सौवर्चलमित्येके, तन्न, यदाहुः **नागार्जुनपादा एव योग-मञ्जर्याम्-**

बृहत्यौ बिल्वमेरण्डो मातुलुङ्गं त्रिकण्टकम्।
पाषाणभेदकं तैस्तु क्वाथो हिङ्गुसमायुतः।।
सैन्धवक्षारसंयुक्तस्तैलेनैरण्डजेन वा।
पीतो निहन्ति साटोपं सामवातं विशेषतः।
श्रोण्यंसमेढ्रहृदयस्तनरोगेषु शस्यते।। इति।

अयं योगः सामवाताधिकारे **चन्द्रटेन** लिखितः। अतस्तत्रापि कर्त्तुं युज्यते।। इति।। (चक्रदत्त-रत्नप्रभा, शूलचिकित्सा-५४, पृ.सं. ४४६)

कफवातरोग चिकित्सा-

रुचकादि चूर्ण (योग सं.- २१)

चूर्णं समं रुचक-हिङ्गु-महौषधानां
शुण्ठ्यम्बुना कफसमीरणसम्भवासु।
हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु
पेयं तथा यवरसेन च विड्-विबन्धे।।२०।।

---

२०. ०मुष्णाम्बुना.- ज., शुण्ठ्यम्बुना- ति., इ., च-र.।

रुचक (सौवर्चल लवण/सोंचर नमक), हिङ्गु (हींग) एवं महौषध (शुण्ठी) के चूर्ण को शुण्ठीजल (सोंठ के क्वाथ) के साथ पीना चाहिए। इससे कफवातजन्य रोग नष्ट हो जाते हैं। इस योग के सेवन से हृदय, पार्श्व, पीठ एवं उदर के रोग तथा विषूचिका (हैजा) भी नष्ट हो जाता है। विड्-विबन्ध (मलबद्धता/कब्ज) होने पर इस योग का यवरस (जौ के क्वाथ) के साथ सेवन करना चाहिए। इससे विड्-विबन्ध रोग दूर हो जाता है। उष्ण जल के साथ भी इसे लिया जा सकता है। 'योगरत्नसमुच्चय' में 'चन्द्रट' ने 'नागार्जुन' का उद्धरण देते हुए उष्ण जल से लेने का विधान किया है। यह उल्लेख आगे उद्धृत निश्चलकर-टीका में द्रष्टव्य है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

चूर्णमित्यादि **योगशतस्य**। रुचकं सौवर्चलम्। रुचकादीनां समं तुल्यं चूर्णं हिंग्वष्टकादिवदिति **सनातनः**। समं सार्धमिति **कर्ममाला**। अत एव **चक्रो**ऽपि वक्ष्यति- 'समं शुण्ठ्यम्बुने'त्यादि। **वृन्दस्त्वाह**-

क्वाथेन चूर्णपानं यत्तत्र क्वाथप्रधानता। प्रवर्त्तते तु तेनात्र चूर्णपेक्षी चतुर्द्रवः।।
हिङ्गुनः स्वल्पमानोक्तिः समशब्दे सहार्थता।। इति।

ननु क्वाथस्यात्र कथं प्राधान्यम्? क्वाथेन चूर्णपलादिति चेत्, एवं तर्हि तस्यैव प्राधान्यम्, प्राधान्यं तु चूर्णस्य पेयत्वात्, सहार्थे तृतीयायोगादपि क्वाथस्यैवाप्राधान्यमापतितम्। सत्यम्, किन्त्वयमाशयो **वृन्दस्य**-'पातव्यश्च चतुर्द्रवः-' इत्येषा परिभाषात्र न प्रवर्तते, अन्यत्र कट्वरोदक-काञ्जिक-मस्तुकादौ चरितार्थत्वात्। कात्र युक्तिः? अत्रोत्तरं क्वाथेन चूर्णेत्यादि। को भावः? क्वाथकरणं क्वाथ्यद्रव्यसापेक्षम्, क्वाथ्यद्रव्यञ्चोत्तमपुरुषोपेक्षम्, अतस्तद्द्रव्यं पलत्रिकर्षार्धपलमानमुत्सर्गतो व्यवस्थितम्। तदपेक्षश्च क्वाथः, स चोत्तमपुरुषाद्यभिप्रायात् व्याधिचिकित्सोक्तेरभाव इति विपक्षे दण्डदर्शनात्, यथावस्थितभागावशिष्टक्वाथप्रयोगात् क्वाथप्रधानतेत्यभिप्रायः। अयञ्च सुप्रसिद्धवृद्ध**वैद्यव्यवहार** एवायुर्वेद-

सिद्धान्तसिद्धसन्तानक्रमेणावस्थितो लिखितो **वृन्देन**, न च किञ्चिद् दोषलिङ्गं स्पृशति, ततश्च 'प्रक्षेपः पादिकः क्वाथ्यात्' इत्यस्य विषयो भविष्यति। मैवम्, शुण्ठीक्वाथश्चतुर्भागविशिष्ट इति युक्तोऽयं पक्षः। **आयुर्वेदसारे** हि समशब्दो नास्ति, भागानुक्तो तुल्यार्थस्य लब्धत्वात्, तथाहि-

शुण्ठीरुचकहिङ्गूनां चूर्णं विश्वाम्बुना पिबेत्।
कफवातोद्भवे शूले बीजपूररसेन च।। इति।।

उष्णोदकेनापीदं क्रियते, यदुक्तं **चन्द्रटे नागार्जुनीयोक्तम्**-

सौवर्चलं हिङ्गु सनागरञ्च चूर्णीकृतं पीतमशीततोयैः।
हृत्पृष्ठकोष्ठान्तरबस्तिशूलं प्रणाशयेदेतदतिप्रवृद्धम्।। इति।

(चक्रदत्त-रत्नप्रभा, शूलचिकित्सा- ५०, पृ. ४४५)

गुल्मोदराजीर्णविषूचिका चिकित्सा-

हिंगूग्रगन्धादि योग (योग सं.- २२)

हिंगूग्रगन्धा-विड-शुण्ठ्यजाजी-
हरीतकी-पुष्करमूल-कुष्ठम्।
भागोत्तरं चूर्णितमेतदिष्टं
गुल्मोदराजीर्ण-विषूचिकासु।।२१।। (च.चि.- २६.२२)

हिङ्गु (हींग), उग्रगन्धा (वचा), विड लवण, शुण्ठी (सोंठ), अजाजी (जीरा), हरीतकी (हरड़), पुष्करमूल एवं कुष्ठ (कूठ)- इनको उत्तरोत्तर एक-एक भाग की अधिकता के साथ लेते हुए चूर्ण बनाएं। भाव यह है कि चूर्ण बनाते समय यदि हींग १० ग्राम हो तो वचा २० ग्राम, विड लवण ३० ग्राम, शुण्ठी ४० ग्राम, जीरा ५० ग्राम, हरड़ ६० ग्राम, पुष्करमूल ७० एवं कूठ ८० ग्राम होना चाहिए। इस प्रकार भागोत्तर अर्थात् एक-एक भाग बढ़ाते

२१. विसूचिकासु- ति., च-र., विषूचिकासु- इ.।

हुए चूर्ण बनाना चाहिए। इस चूर्ण के सेवन से गुल्म, अजीर्ण एवं विषूचिका (हैजा) रोग नष्ट हो जाता है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

हिंग्वित्यादि **चरकस्य**। अस्य त्वर्ध एवोत्पादाद् वातादुक्तः। भागशब्दोऽत्र समुदायवाची, तेन एको भागः, द्वौ वचाया इत्यादीति **वल्लभा। आयुर्वेदसारे**ऽपि-

हिङ्गुमुग्रां विडं विश्वं जीरं पथ्यां सपुष्करम्।
कुष्ठं च भागसंवृद्धं पिबेद् गुल्मोदरापहम्।।

अत एव **वृद्धवैद्या** उष्णोदकं पानार्थमुपदिशन्ति। भागोत्तरं भागवृद्धमित्यर्थः। भागशब्दश्चांशवाचीति।

(चक्रदत्त-रत्नप्रभा, गुल्मचिकित्सा- ४७, पृ. ४७७)

पूतीकादि क्षार (योग सं.- २३)

पूतीकपत्र-गजचिर्भिट-चव्य-वह्नि-
व्योषं च संस्तरचितं लवणोपधानम्।
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं
गुल्मोदर-श्वयथु-पाण्डु-गुदोद्भवेषु।।२२।।

पूतीकपत्र (करञ्जपत्र), गजचिर्भिट (इन्द्रवारुणी/गड़तुम्बा), चव्य (चविका), वह्नि (चित्रक), व्योष (त्रिकटु)- इन्हें संस्तरचित करते हुए, तह जमाते हुए प्रत्येक पर लवण का लेपन करें; तदनन्तर उन्हें जलाकर बनी भस्म का दधिमस्तु (दही के ऊपर तैरने वाले पानी) के साथ सेवन करें। इससे गुल्म, उदररोग, श्वयथु (सूजन), पाण्डु (पीलिया) एवं गुदोदर रोग नष्ट हो जाते हैं। यह योग वैद्यजनों में **पूतीकादि क्षार** नाम से प्रसिद्ध है।

२२. गुदोदरेषु- मै., गुदोद्भवेषु- ति., इ., च-र.।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

पूतीकेत्यादि **योगशतस्य।** पूतीको लालाकरञ्जोऽस्य पत्राणि। गजचिर्भिटो गोरक्षकर्कटी, वह्निश्चित्रकः। पूतीकपत्रादिभिः संस्तरं दत्त्वा तत्र लवणं सैन्धवं दग्धव्यम्। लवणं पूतीकपत्रादिसमम्, **सुश्रुत**वाताधिकारे पत्रलवणे **गयदास-कार्त्तिकाभ्यां** तथा व्याख्याततत्वात्। लवणं सैन्धवं विद्यादिति यद्यप्युच्यते तथाप्यस्य योगस्य वातजयार्थत्वात् प्रचुरलवणस्यापि वातहरत्वाद् ग्रहणम्। अत एवंविधयोगे प्रचुरं लवणमपि क्रियते। सैन्धवं प्रक्षेपे पेयादिसंस्कारे लवणशब्देन बोध्यमित्युत्कृष्टलवणत्वादिति **गुरुग्रन्थः।** अन्ये तु पञ्चलवणमित्याहुः, वातहन्तृत्वात्। एवमेतत् सर्वम्, **यदुक्तमायुर्वेदसारे-**

चिरिबिल्वदलव्योषमैन्द्री-चव्याग्निसैन्धवैः।
संस्तरे निचितं दग्ध्वा गुल्मघ्नं मस्तुना पिबेत्।। इति।।

कर्ममालाप्येतादृशी। (चक्रदत्त-रत्नप्रभा, गुल्मचिकित्सा-४०, पृ.४७५)

इसकी व्याख्या करते हुए निश्चलकर कहते हैं कि प्रस्तुत श्लोक भी 'योगशत' से लिया गया है। इसमें प्रयुक्त ओषधियों का विवरण देते हुए वे कहते हैं कि यहाँ 'पूतीक' का अर्थ 'लालाकरञ्ज' है। इस योग में इसके पत्रों का प्रयोग होता है। 'गजचिर्भिट' का अर्थ 'गोरक्षकर्कटी' (बड़ी इन्द्रवारुणी) है। वह्नि शब्द से यहाँ चित्रक समझना चाहिए। इस योग में पूतीकपत्र आदि से संस्तर बनाना चाहिए- अर्थात् इनकी तह बनाकर ऊपर लवण रखकर सभी को जला देना चाहिए। लवण की मात्रा पूतीकपत्र आदि के समान होनी चाहिए। भाव यह है कि पूतीकपत्र आदि सभी ओषधियों को मिलाकर जितनी मात्रा बनती है, उतनी ही मात्रा में लवण लेना चाहिए। यह तथ्य 'सुश्रुतसंहिता' के वाताधिकार में 'पत्रलवणे' शब्द की व्याख्या में व्याख्याकार **गयदास** एवं **कार्त्तिक** ने सूचित किया है।

यद्यपि लवण से आयुर्वेद में सैन्धव लवण ही लिया जाता है, तथापि इस योग के वातजयार्थ होने के कारण प्रचुर लवण का ग्रहण मानना चाहिए; क्योंकि यह वातहर होता है। अत: इस प्रकार के प्रयोग में लवण शब्द से प्रचुर लवण लिया जाता है। गुरुग्रन्थ (व्याख्याकार निश्चलकर के गुरुजी द्वारा रचित ग्रन्थ) में भी इसी तथ्य का समथर्न करते हुए कहा है कि- प्रक्षेप में पेया आदि का संस्कार करते समय लवण शब्द से सैन्धव लवण लेना चाहिए, उत्कृष्ट होने के कारण। अत: ऐसे स्थलों में उसकी अपेक्षा अधिक वातहर होने से प्रचुर लवण का ग्रहण ही उचित है।

कुछ व्याख्याकार तो यहाँ लवण शब्द से- सैन्धव, रुचक, कृष्ण, विड एवं सामुद्र- इन पाँच लवणों का ग्रहण करते हैं, वातनाशक होने से। ये सभी व्याख्याएं उचित हैं, जैसा कि **आयुर्वेदसार** में भी कहा है। चिरबिल्वपत्र (पूतीकपत्र), त्रिकटु, ऐन्द्री (जलनीम), चव्य, अग्नि, सैन्धव- इन सबको संस्तर-निचित कर (तह बनाकर) जलाना चाहिए तथा इनकी भस्म को मस्तु के साथ पीना चाहिए। इससे गुल्मरोग नष्ट हो जाता है। 'योगशत' की व्याख्या कर्ममाला भी ऐसा ही विवरण प्रस्तुत करती है।

श्वास-ऊर्ध्ववात-कास-अरुचि-पीनस चिकित्सा-

शृङ्ग्यादि चूर्ण (योग सं.- २४)

शृङ्गीकटुत्रिक-फलत्रय-कण्टकारी-
भार्गी सपुष्करजटा लवणानि पञ्च।
चूर्णं पिबेदशिशिरेण जलेन हिक्का-
श्वासोर्ध्ववातकसनारुचिपीनसेषु।।२३।।

शृङ्गी (कर्कटशृंगी/काकड़ासिंगी), त्रिकटु, त्रिफला, कण्टकारी, भार्गी, पुष्करजटा (पुष्करमूल) एवं पाँचों लवण- सैन्धव, रुचक (काला नमक),

२३. शृङ्गीफलत्रयकटुत्रय- ति.। शृङ्गीकटुत्रिकफलत्रय- इ.। शृङ्गीकटुत्रयफलत्रय- च-र.।

सौवर्चल (सोंचर नमक), विड और सामुद्र- इन सबका चूर्ण बनाकर उष्ण जल के साथ पीना चाहिए। इससे हिक्का, हिचकी, श्वास (दमा), ऊर्ध्ववात, कसन (खांसी), अरुचि (अरोचक) रोग तथा पीनस (पुराना जुकाम) इत्यादि रोग नष्ट हो जाते हैं।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

शृङ्गीत्यादि **योगशतस्य**। अत्र पुष्करजटा पुष्करमूलम्, न जटामांसी, यदुक्तम् **अक्षदेवीययोगशते**-

> बृहतीपुष्करभार्गीशृङ्गीत्रिफलाकटुत्रयाणाञ्च।
> चूर्णं सपञ्चलवणं श्वासहरं कोष्णवारिणा पीतम्।। इति।
>
> (चक्रदत्त-रत्नप्रभा, हिक्काश्वासचिकित्सा- ९, पृ. २८९)

नादेयीक्षार (योग सं.- २५)

नादेयी-कुटजार्क-शिग्रु-बृहती-स्नुग्-बिल्व-भल्लातक-
व्याघ्री-किंशुक-पारिभद्रक-जटापामार्ग-नीपाग्निकान्।
वासामुष्ककपाटलासलवणान् दग्ध्वा रसं पाचितं
हिंग्वादिप्रतिवापमेतदुचितं गुल्मोदराष्ठीलिषु।।२४।।

नादेयी (भूमिजम्बू/जामुन का एक भेद), कुटज (इन्द्रजौ), अर्क (आक), शिग्रु (सहिजन), बृहती (बड़ी कण्टकारी), स्नुक् (थूहर), बिल्व, भल्लातक (भिलावा), व्याघ्री (छोटी कण्टकारी), किंशुक (पलाश/ढाक), पारिभद्रकजटा (नीम की जड़), अपामार्ग (चिरचिटा/उल्टा काँटा), नीप (कदम्ब), अग्निक (चित्रक), वासा (अडूसा), मुष्कक (मोखा), पाटला

---

२४. ० भल्लातकी- च-र., ० भल्लातक- ति., इ.। पारिभद्रकटुका- ति., पारिभद्रकजटा- इ., च-र.।

तथा लवण- इन्हें जलाकर भस्म रूप क्षार राशि को एकत्र कर लें। इस क्षार को अर्द्धपल मात्रा में लेकर छह गुना जल में पकाएं। आधा शेष रहने पर इसे स्वच्छ वस्त्र या चालनी से छानकर इसमें हिंग्वादि चूर्ण (२१वें श्लोक में वर्णित) का प्रतिवाप (प्रक्षेप) देकर पान करें। यह योग गुल्मरोग, उदररोग एवं अष्ठीला आदि को नष्ट कर देता है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

नादेयीत्यादि **योगशतस्य**। नादेयी भूमिजम्बूः, तर्कारी केचिदिति **सनातनः**। नादेयीकुटजादीनां जटा मूलम्, न जटामांसी। अग्निश्चित्रकः यदुक्तमायुर्वेदसारे-

नादेयी कुटजं व्याघ्री कुली भल्लातकं वृषम्।
मुष्ककं पाटली नीपं किंशुकं पारिभद्रकम्।।
स्नुह्यर्कचित्रकं मार्गविश्वशिग्रुकसैन्धवम्।
दग्ध्वा पक्त्वा स्रुताश्चापो हिंग्वाद्यावापसंयुताः।।
पिबेन्मारुतगुल्मघ्नीर्जठराष्ठीलनाशिनीः।
वातव्याधिहराश्चैव वह्निसन्दीपनीः पराः।। इति।

अत्र कुली बृहती। **सनातनस्त्वाह**- कुटज इन्द्रयवः, कुटजत्वगिति केचित्। पारिभद्रस्यैव जटा मूलम्, अतो भल्लातकस्य फलम्। नादेय्यादिद्रव्यं पाटलान्तं दग्ध्वा क्षारः कार्यः। अस्मात् क्षारराशेराकृष्य उत्तमाद्यपेक्षया पल-त्रिकर्षार्धपलपरिमितं क्षारं षड्-गुणजले क्वाथयित्वार्धावशिष्टं त्रिभागावशिष्टं वा कृत्वा वस्त्रे एकविंशतिं वारान् परिस्राव्य पेयमिति, न त्वेकदा क्षारोदकं कृत्वा स्थाप्यम्, व्यापद्भयादिति **सुश्रुते** गुल्माधिकारे **गयदासः**। अत्रापि स एव न्यायः। अत एवोक्तम्-

पानीयो यस्तु गुल्मादौ तं वारानेकविंशतिम्।
आवपेत् षड्-गुणे तोये केचिदाहुश्चतुर्गुणे।। इति।

केचित् षोडशगुणजलेनाष्टांशशेषितं क्वाथमेव पाययन्ति। अत्रापि तदनुसारात्तथैव कार्यम्। अयं विधिः सर्वत्र पेये क्षारे बोध्यः। एतच्च हिंग्वादि प्रक्षिप्य पातव्यमित्याह- हिंग्वादीत्यादि। हिंग्वादिलब्धेऽपि लवणे सलवणा इति अधिकलवणप्रक्षेपार्थम्। अत्रोक्तहिंग्वादिद्वयमध्येऽन्यतरदिति **बकुलः।** हिंग्वादिपानं तुर्येणाष्टमकेनेत्यपि युक्तम्। **योगशतटीकाकारस्तु**- अत्रोक्तहिंग्वादिकमिति व्याचष्टे। (चक्रदत्त-रत्नप्रभा, गुल्मचिकित्सा-४ पृ. ४७६)

वैस्वर्य-पीनस-कफ-अरुचि चिकित्सा-

बृहत्तालीस मोदक (योग सं.- २६)

चव्याम्लवेतस-कटुत्रिक-तिन्तिडीक-
तालीस-जीरक-तुगा-दहनैः समांशैः।
चूर्णं गुडप्रमृदितं त्रिसुगन्धयुक्तं
वैस्वर्यपीनसकफारुचिषु प्रशस्तम्।।२५।।

चव्य (चविका), अम्लवेतस, त्रिकटु, तिन्तिडीक (इमली), तालीस (तालीसपत्र), जीरक (जीरा), तुगा (वंशलोचन), दहन (चित्रक/जंगली कालीमिर्च)- इन्हें समान मात्रा में लेकर चूर्ण बनाएं। इस चूर्ण के बराबर मात्रा में गुड़ मिलाकर सभी को मसलें एवं चूर्ण के चतुर्थांश परिमाण में त्रिसुगन्ध (दालचीनी, इलायची, तेजपात) डालकर सेवन करें। इसमें त्रिसुगन्ध की मात्रा उतनी भी रखी जा सकती है, जिससे अपेक्षित सुगन्ध हो जाए। यह योग वैस्वर्य (स्वर की विकृति), पीनस (नजला), कफविकार एवं अरुचि को नष्ट करता है। यहां चक्रदत्तरत्नप्रभाकार निश्चलकर ने गुड की मात्रा चूर्ण के बराबर बताई है, परन्तु रूपनयन-टीका में इसे चूर्ण से दोगुना बताया है।

---

२५. चव्यम्ल- च-र., चव्याम्ल- ति., इ.। कटुत्रिक- इ., कटुत्रय- ति. च-र.। त्रिसुगन्धि- इ., च-र., त्रिसुगन्ध- ति.। समानैः- च-र., समांशैः- इ., ति.।
० गुडत्रिगुणितं- रू., गुडप्रमुदितं- इ., गुडप्रमृदितं- रूपनयन-सूचित पाठान्तर।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

चवीत्यादि ख्यातं **योगशतस्य**। तिन्तिडीकं महार्द्रकम्, तुगा वंशलोचना। समुदितचूर्णसमो गुडः, त्रिसुगन्धि चतुर्थांशिनेति **वृद्धा** इति **गुरवः**।

त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते।। इति **नागभर्तृतन्त्रम्**।

वृद्धवैद्यव्यवहारादन्यद्रव्याच्चतुर्थांशः प्रत्येकं त्रिजातस्य गृह्यत इति **कर्ममाला**।

(चक्रदत्त-रत्नप्रभा, स्वरभेदचिकित्सा- ६, पृ. २९५)

कास, अग्निमान्द्य, अर्शचिकित्सा-

लघु तालीस मोदक (योग सं.- २७)

तालीसचव्यमरिचं सदृशं द्विरंशां
मूलानुगां मगधजां त्रिगुणां च शुण्ठीम्।
कृत्वा गुडत्रिगुणितां गुटिकां सुगन्धां
कासाग्निसाद-गुदज-ज्वररुक्षु दद्यात्।।२६।।

तालीस (तालीसपत्र), चव्य (चविका), मरिच (कालीमिर्च)- इन्हें समान मात्रा में लें। पिप्पली एवं पिप्पलीमूल को द्विगुण मात्रा में लें। शुण्ठी (सोंठ) को त्रिगुण मात्रा में लें। इनका चूर्ण बनाकर गुड़ के साथ मसलकर एवं अपेक्षित मात्रा में त्रिसुगन्ध (दालचीनी, इलायची, तेजपात) डालकर गुटिका बनाएं। यह कास (खाँसी), अग्निमान्द्य (मन्दाग्नि), गुदज (बवासीर) एवं ज्वररोग को नष्ट करती है। इसमें गुड की मात्रा चूर्ण से दोगुनी होनी

२६. 'मूलं तुगामगधजं'- इति इ.पुस्तके मुद्रितपाठोऽशुद्धः। 'मूलानुगां मगधजां'- इति ति.-मातृकानुसारी पाठस्तु शुद्धः। कासाग्निमान्द्य- इ., कासाग्निसाद- ति.।

चाहिए। औषध-योगों में एक से तीन वर्ष तक पुराना गुड लिया जाता है, नया नहीं। नया गुड मन्दाग्निकारक एवं कृमिजनक होने से आयुर्वेद में सामान्यत: त्याज्य माना गया है।

समसित/समशर्कर चूर्ण (योग सं.- २८)

शुण्ठी-कणा-मरिच-नाग-दल-त्वगेलं
चूर्णीकृतं क्रमविवर्धितमूर्ध्वमन्त्यात्।
खादेदिदं समसितं गुदजाग्निमान्द्य-
गुल्मारुचि-श्वसन-कण्ठहृदामयेषु।।२७।।

शुण्ठी (सोंठ), कणा (पिप्पली), मरिच (कालीमिर्च), नाग (नागकेशर) दल (पत्रक/तेजपात), त्वक् (दालचीनी), एला (छोटी इलायची)- इन्हें अन्त से पूर्व की ओर क्रमश: अधिक मात्रा में लेकर चूर्ण बनाएं। अर्थात् इलायची का एक भाग, दालचीनी के दो भाग, तेजपात के तीन भाग, नागकेशर के चार भाग, कालीमिर्च के पाँच भाग, पिप्पली के छह भाग तथा शुण्ठी के सात भाग लेने चाहिए। इनसे जितना चूर्ण बने उतनी ही शर्करा मिलाएं। इस प्रकार यह 'समशर्कर' नामक चूर्ण कहलाता है। इसके सेवन से गुल्म, अरुचि, श्वासरोग, हृदयरोग एवं कण्ठरोग नष्ट हो जाते हैं।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

शुण्ठीत्यादि **योगशतस्यैव**। (दलं पत्रकम्) क्रमविवर्धितमूर्ध्वमन्त्यादिति एलाया एको भाग:, त्वचो भागद्वयम् पत्रकस्य भागत्रयम्, (एवं समस्तेष्वपि) मिलितचूर्णसमा शर्करा, (अत एव समशर्करं चूर्णम्)।

(चक्रदत्त-रत्नप्रभा, अर्शश्चिकित्सा- ६४, पृ. १७१)

२७. त्वगेला.- इ., त्वगेलं- ति.।

क्षुधावर्द्धक सैन्धवादि योग (योग सं.- २९)

सिन्धूत्थहिङ्गुत्रिफलायवानी-
व्योषैर्गुडांशैर्गुडकान् प्रकुर्यात्।
तैर्भक्षितैस्तृप्तिमवाप्नुवन्ना
भुञ्जीत मन्दाग्निरपि प्रभूतम्।।२८।।

सिन्धूत्थ (सैन्धव लवण), हिङ्गु (भुनी हींग), त्रिफला, यवानी (अजवायन), व्योष (त्रिकटु)- इनका चूर्ण बनाएं। इस चूर्ण के समान मात्रा में गुड़ मिलाकर गुडक (छोटे-छोटे गोले) बना लें। इनके सेवन से क्षुधा बहुत तीव्र हो जाती है तथा मन्दाग्नि व्यक्ति भी तृप्त न होता हुआ पर्याप्त आहार लेने लगता है। टीकाकार रूपनयन के अनुसार यहां गुड की मात्रा चूर्ण से दो गुना लेनी चाहिए, परन्तु निश्चलकर का मत है कि गुड की मात्रा चूर्ण के समान ही लेनी चाहिए।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

सिन्धूत्थेत्यादि ख्यातं **योगशतस्य**। गुडांशैरिति एकद्रव्यभागसमो गुडः। अग्निमान्द्यं हि प्रायः कफाधिक्याद् भवति, कफे तु गुडः प्रचुरोऽयुक्तः। गुडिका न भवतीति चेत्, मा भवतु, मनागधिकस्तु वाते। पित्ते त्वयं योगो न क्रियते एव तीक्ष्णत्वादिति **बकुलः**। सर्वचूर्णसमो गुड इति **वल्लभायां सनातनः**। गुडादंशोऽर्धं येषां समुदितानां ते गुडांशाः, अतो 'मोदके द्विगुणो गुडः' (इत्यत्र युज्यते) इति **कर्ममालायां सोमदासः**। विच्छेदपाठादंशशब्दाच्च **सनातनपक्षो** युक्तः, गुडककरणानुपपत्तेः वक्ष्यमाणयोगे तुल्यगुडेनेति दर्शनाच्च। न च गुडद्वैगुण्यं कफाधिक्यदोषादेव। तृप्तिमवाप्नुवन्निति मन्दाग्निरपि तावत् प्रभूतं भङ्क्ते यावत्तृप्तिमेति। अनाप्नुवन्निति पाठे, अत्यग्नित्वाच्च प्रभूतं भुञ्जानो न तृप्यति। (चक्रदत्त-रत्नप्रभा, अग्निमान्द्यचिकित्सा-१२, पृ.२०२)

२८. गुटिकां- ति., इ., गुडकान्- च-र.। प्रयुञ्जात्- च-र., प्रकुर्यात्- ति., इ.। तृप्तिमनाप्नुवन्, तृप्तिमवाप्नुवन्- इति निश्चलकर-सूचितं पाठान्तरम्।

आम-अजीर्ण-अर्श-वर्चोविबन्ध चिकित्सा-

गुडशुण्ठी आदि योग (योग सं.- ३०-३३)

गुडेन शुण्ठीमथवोपकुल्यां
पथ्यां तृतीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्चोविबन्धेषु च नित्यमद्यात्।।२९।।

गुड़ के साथ शुण्ठी का सेवन करने से आम (आंव), अजीर्ण (अर्श/ बवासीर) एवं वर्चोविबन्ध (मलबद्धता/कब्ज) आदि रोग नष्ट हो जाते हैं। इसी प्रकार गुड़ के साथ उपकुल्या (पिप्पली), पथ्या (हरड़) एवं दाडिम (अनार)- इन सभी का अलग-अलग सेवन करने से भी पूर्वोक्त रोग नष्ट हो जाते हैं। इस प्रकार इस श्लोक में चार योग निर्दिष्ट हैं।

योगशत के प्राचीन टीकाकार **सनातन** के अनुसार गुड-शुण्ठी वाला पहला योग आम (आँव) में प्रयुक्त करना चाहिए तथा गुड-पिप्पली वाला दूसरा योग अजीर्णरोग में। इसी प्रकार गुड-हरीतकी वाला तीसरा योग बवासीर तथा गुड-दाडिम वाला चतुर्थ योग मलबद्धता में उपयोगी होता है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

गुडेनेत्यादि ख्यातं तस्यैव। एते चत्वारो योगाः आमादिषु क्रमेण योज्या इति **सनातनः**। (उपकुल्या पिप्पली)। अस्मिन् योगे- 'पथ्यां तृतीयां' इति पाठः, अतस्तृतीयामिति योगविच्छेदे। अन्ये तु त्रिसमं त्रयमित्याहुः। (अत एव **चन्द्रकलायां**) गुडेन शुण्ठीं पथ्यां तृतीयाम्, एवं दाडिमपथ्यामिति योजिता। अत्र (पक्व)फलं दाडिमादीनामित्यादि आमादिषु (सर्वेषु) यथायोगं बोध्यम्। गुडशुण्ठीभक्षणं (गुड)पिप्पलीभक्षणं वा तत्प्रयोगान्तरमेवेति **चक्रः**। पथ्यातृतीयां

२९. नित्यमिष्टम्, नित्यमद्यात्- इ., ति.। पथ्यातृती.- ति., पथ्यां तृती.- इ., च-र.।

दाडिममिति पदे भिन्नलिङ्गता स्यादिति **कर्ममाला**, तत्र विधेयवल्लिंगवचनानि भवन्तीति नपुंसकत्वमिति **वल्लभायां** परिहारः।

(चक्रदत्त-रत्नप्रभा, अग्निमान्द्यचिकित्सा- १५, पृ. २०३)

पाण्डुरोग-चिकित्सा-

अयस्तिल मोदक (योग सं.- ३४)

अयस्तिलत्र्यूषणकोलभागैः
सर्वैः समं माक्षिकधातुचूर्णम्।
तैर्मोदकः क्षौद्रयुतोऽनुतक्रः
पाण्ड्वामये दूरगतेऽपि शस्तः।।३०।।

अयः (विशिष्ट विधि से शोधित लोहचूर्ण अथवा लोहभस्म), तिल, त्र्यूषण (त्रिकटु) एवं कोल (बदरीफल/बेर)- इन्हें समान मात्रा में लें। इन सबके बराबर शोधित माक्षिक धातु (सोनामाखी) का चूर्ण (भस्म) लें; तदनन्तर मधु मिलाकर मोदक (लड्डू) बना लें। इसका सेवन करने के उपरान्त अनुपान के रूप में तक्र लें। इससे बहुत बढ़ा हुआ पाण्डुरोग (पीलिया) भी नष्ट हो जाता है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

अय इत्यादि ख्यात**मितप्रभस्य**। अयःशुद्धिः पूर्ववत्। त्र्यूषणं त्रिकटु, कोलं बदरफलमत्र, न कर्षार्धं वाच्यम्, यदाह **सुदान्तसेनः**–

लोहकोलतिलव्योषैः समैर्माक्षिकधातुना।
मधुना वटकान् कृत्वा जग्ध्वा तक्रं पिबेदनु।। इति।

रविगुप्तोऽपि-

लोहचूर्णं तिलव्योषकोलैस्ताप्यसमैः समम्।
पिण्डी मधुकृता घोरशोथपाण्डु-निवारणी।। इति। (सिद्ध.सं.-१४.११)

तिलः कृष्णः, एतत्कोलं कर्षार्धमिति **वल्लभा-दीपिका**व्याख्यानं प्रत्युक्तम्।

(चक्रदत्त-रत्नप्रभा, पाण्डुरोगचिकित्सा- ९, पृ. २२४)

यह श्लोक रत्नप्रभाकार ने मुखरोग-चिकित्सा प्रकरण में 'सक्षौद्रं धारयेदेतद्०' (चक्रदत्त, मुखरोगचिकित्सा- ७४) इस श्लोक की व्याख्या में निम्न प्रकार से उद्धृत किया है- यदुक्तं **योगशते**- 'अयस्तिलत्र्यूषणकोलभागैः सर्वैः समं माक्षिकचूर्णम् इत्यादि। अत्रैव **सुदान्तसेनः**-

लोहकोलतिलव्योषैः सर्वैर्माक्षिकधातुना।
मधुना वटकान् कृत्वा जग्ध्वा तक्रं पिबेदिति।।

(चक्रदत्त-रत्नप्रभा, मुखरोगचिकित्सा- ७४, पृ. ७४५)

श्वासकासचिकित्सा-

हरीतक्यादि गुटिका (योग सं.- ३५)

हरीतकी-नागर-मुस्तचूर्णै-
र्गुडेन मिश्रैर्गुटिका विधेया।
निवारयत्यास्यविधारितेयं
श्वासं प्रवृद्धं प्रबलं च कासम्।।३१।।

हरीतकी (हरड़), नागर (शुण्ठी) एवं मुस्ता (मोथा) का चूर्ण बनाएं तथा इसके समान मात्रा में गुड़ मिलाकर गोली बना लें। मुख में रखकर चूसने से यह गोली बढ़े हुए श्वासरोग (दमा) एवं प्रबल कासरोग (खांसी) को भी नष्ट कर देती है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या इस प्रकार से है-

हरीतकीत्यादि ख्यात**ममितप्रभस्य**। गुडेन तुल्यं समुदितचूर्णेन सह समो गुड इत्यर्थः। युक्तमिति पाठे मोदके द्विगुणो गुडः इत्याहुः। **आयुर्वेदसारे**ऽपि-

---

३१. ०चूर्णं गुडेन तुल्यं गुडिका- च-र.। ०चर्णे गुडेन बद्धा गुटिका- इ.। ०गुडेन सार्द्धं गुटिका- ज., ०चूर्णैर्गुडेन मिश्रैर्गुटिका- ति.। गुडेन चेत्थं गुटिका- रू.। निवारयत्यास्यविधारितेयं- ति., च-र., निवारयेदास्यविधारितेयं- इ.। निवारयत्याशु मुखे विधारिता- भो.१, विधारितैषा- क.।

चूर्णं विश्वाब्दपथ्यानां गुडेन गुटिका: कृता:।
वक्त्रेण धारिता: घ्नन्ति कासं श्वासं महाबलम्।। इति।
(चक्रदत्त-रत्नप्रभा, कासचिकित्सा- २९, पृ. २७६)

छर्दिचिकित्सा-

मनश्शिलादि चूर्ण (योग सं.- ३६)

मनश्शिलामागधिकोषणानां
चूर्णं कपित्थाम्लरसेन युक्तम्।
लाजैस्समांशं मधुनावलीढं
छर्दिं प्रवृद्धामसकृन्निहन्ति।।३२।।

शोधित मनश्शिला (मैनशिल), मागधिका (पिप्पली) तथा ऊषण (कालीमिर्च)- इनके चूर्ण को कपित्थ रस एवं अम्ल (निम्बूरस) के साथ कल्कित कर इसके समान मात्रा में लाजा (खील) मिलाएं। तदनन्तर इसमें उचित मात्रा में मधु मिलाकर चाटें। यह योग बहुत बढ़ी हुई छर्दि को भी नष्ट कर देता है।

चक्रदत्त के 'लाजाकपित्थमधु०' (चक्रदत्त, छर्दिचिकित्सा-२७) इस श्लोक की व्याख्या करते हुए रत्नप्रभाकार ने 'योगशत' के प्रस्तुत श्लोक को उद्धृत करते हुए निम्न प्रकार से व्याख्या की है-

लाजेत्यादि। श्लोकार्धैस्त्रयो योगा:। तत्राद्यो योग: मन:शिलाबीजपूराभ्यामपि, यदुक्तं **योगशते-**

मन:शिलामागधिकोषणानां चूर्णं कपित्थाम्लरसेन युक्तम्।
लाजै: समांशैर्मधुनावलीढं छर्दिं प्रसक्तामपि हन्ति शीघ्रम्।। इति।

---

३२. सितयावलीढं- मै., समांशं मधुनावलीढं- ति., भो.६। समांशैर्मधुनावलीढं- भो.२, च-र., इ.। प्रवृद्धामसकृन्निहन्ति- भो.२, प्रसक्तामसकृन्निहन्ति- भो.६, ति., इ., प्रसक्तामपि हन्ति शीघ्रम्- च-र.।

अत्राम्लो बीजपूरकः। तथाहि **चरकः**-

मनःशिलायाः फलपूरकस्य रसैः कपित्थस्य च पिप्पलीनाम्।
क्षौद्रेण चूर्णं मरिचैः सलाजं लिहञ्जयेच्छर्दिमुदीर्णवेगाम्।। इति।

(च.चि.- २०.३९)

(सुदान्तसेनोऽपि)-

लीढं लाजा-शिला-कृष्णा-मरिचं बीजपूरकात्।
स्वरसेन कपित्थस्य च क्षौद्रेण वमिं जयेत्।।

रविगुप्तोऽपि-

कृष्णोषणशिलाचूर्णं लाजाचूर्णं समाक्षिकम्।
कपित्थबीजपूराम्लकल्कितं छर्दिनाशनम्।। इति। (सिद्ध.सं.- १७.११)

अतः कपित्थफलस्यैवाम्लो रस इति न व्याख्या युक्तेति **कर्ममाला**।

(चक्रदत्त-रत्नप्रभा, छर्दिचिकित्सा- २७, पृ. ३०५)

तृष्णाचिकित्सा-

तृष्णाहरी गुटिका (योग सं.- ३७)

वटप्ररोहं मधु कुष्ठमुत्पलं
सलाजचूर्णं गुटिकां प्रकल्पयेत्।
समाक्षिका सा वदने विधारिता
तृषं प्रवृद्धामपि हन्ति सत्वरम्।।३३।।

वटप्ररोह (वटशुङ्गा/बड़ की कच्ची कोंपल), मधु, कुष्ठ (कूठ), उत्पल (नीलकमल) एवं लाजाचूर्ण (खील का चूरा) डालकर और मधु मिलाकर गुटिका (गोली) बनाएं। इसे मुख में रखकर चूसें। इससे बहुत बढ़ी हुई प्रबल तृष्णा (प्यास) भी शीघ्र ही नष्ट हो जाती है।

३३.समाक्षिका-, सुसंहता- च-र., सुसंहिता- ति.। वदनेन धारिता- इ., च-र., वदने विधारिता- ति.। गुटिकां प्रकल्पेयत्- ति. इ., गुटिकाश्च कल्पयेत्- च-र.।

चक्रदत्त के '**वटशुङ्गामयक्षौद्र०**' (चक्रदत्त, तृष्णाचिकित्सा-२४, पृ. ३११) इस श्लोक की व्याख्या करते हुए रत्नप्रभाकार निश्चलकर ने 'योगशत' के प्रस्तुत श्लोक को उद्धृत किया है-

वटशुङ्गोऽत्र वटप्ररोहः, यदुक्तममितप्रभे-

वटप्ररोहं मधु कुष्ठमुत्पलं सलाजचूर्णं गुटिकाश्च कल्पयेत्।
सुसंहता सा वदनेन धारिता तृष्णां प्रवृद्धामपि हन्ति सत्वरम्।। इति।

सिद्धसारेऽपि-'वटाङ्कुरोत्पलक्षौद्रलाजकुष्ठैः कृता दृढा' इति।

(तुलनीय- सिद्ध.सं.-१७-१८)

नकसीर एवं हिचकी की चिकित्सा-

नकसीर, हिचकी नाशक योग (योग सं.-३८-४१)

दूर्वारसो दाडिमपुष्पजो वा
घ्राणप्रवृत्तेऽसृजि नस्यमुक्तम्।
स्तन्येन वालक्तरसेन वापि
विण्मक्षिकाणां च निहन्ति हिक्काम्।।३४।।

नाक से खून बहने अर्थात् नकसीर रोग में दूर्वारस (दूब का स्वरस) अथवा दाडिम (अनार) के फूल का रस नस्य के रूप में दें। इससे यह रोग शीघ्र ही दूर हो जाता है। हिक्का (हिचकी) रोग में स्तन्य (नारीदुग्ध) के साथ अथवा अलक्तक-रस (आलता के रस) के साथ मक्षिकाविट् (मधुमक्खी के छत्ते का मोम) देने से शीघ्र ही इसका शमन हो जाता है।

इस पद्य में चार योगों का निर्देश है, नकसीर में- १. दूर्वारस, २. दाडिमपुष्परस। हिचकी में-१. नारीदुग्ध के साथ मक्षिकाविट्, २. अलक्तक रस के साथ मक्षिकाविट्।

३४. नस्यमिष्टम्.- इ., नस्यमुक्तम्.- ति.।

त्वचा रोग चिकित्सा-

सिध्महर उद्वर्त्तन (योग सं.- ४२)

धात्रीफलं सर्जरसः सपाक्यः
सौवीरपिष्टश्च तदासुतश्च।
भवन्ति सिध्मानि यथा न
भूयस्तथेदमुद्वर्त्तनकं करोति।।३५।।

धात्रीफल (आंवला) एवं सर्जरस (राल) के साथ पाक्य (यवक्षार) मिला लें, पुनः इसे सौवीर (काञ्जी) के साथ पीस लें; तदनन्तर इसे पुनः काञ्जी में डालकर आसुत करें- अर्थात् सन्धानविधि के अनुसार तीन दिन डाले रखें। इस प्रकार तैयार किए गए इस योग से उद्वर्त्तन (उबटन) करें। इससे ऐसा प्रभाव होता है कि पुनः शरीर पर सिध्म (सीप/कुष्ठ का एक भेद) नहीं उभरता है।

यहां '**धात्रीफलं**' के स्थान योगशत की अनेक प्रतिलिपियों में '**धात्रीरसः**' पाठ मिलता है, परन्तु योगरत्नसमुच्चयकार 'चन्द्रट' ने '**धात्रीफलं**' पाठ ही माना है। उद्वर्त्तन की दृष्टि से चन्द्रट द्वारा प्रस्तुत पाठ अधिक उचित प्रतीत होता है। योगशत की रूपनयन-टीका में भी यही पाठ स्वीकार किया है। अतः हमने भी बहुज्ञ-सम्मत एवं औचित्यपूर्ण होने से यही पाठ स्वीकार किया है।

विशेष- यह श्लोक 'चक्रदत्त', कुष्ठचिकित्सा-प्रकरण में २९ संख्या पर उद्धृत है। वहाँ चक्रदत्त के हिन्दी व्याख्या संस्करण में 'तदासुतश्च' के स्थान पर 'तथा युतश्च' पाठन्तर को स्वीकार करते हुए जो अनुवाद उपलब्ध है, वह संगत नहीं है।

---

३५. चक्रदत्तेऽपि 'धात्रीरसः' इति पाठः। एतस्य स्थाने 'धात्रीफलम्' इति चन्द्रटसम्मतः पाठः- इति सूचयति चक्रदत्त-रत्नप्रभाकारो निश्चलकरः।

(चक्रदत्त-रत्नप्रभा, कुष्ठचिकित्सा-२९, पृ. ६४४)।

तदा युतश्च.- इ., तथासुतैश्च- च-र., तदासुतैश्च- ति., तदासुतश्च- रू.।

द्रष्टव्य- **'चक्रदत्त'** (पृ. २८१), व्याख्याकार, इन्द्रदेव त्रिपाठी, चौखम्भा संस्कृत भवन वाराणसी, (पुनर्मुद्रण २०११ ई.)। इसका उचित अर्थ यही है, जो ऊपर दिया गया है।

यह श्लोक भी 'चक्रदत्त' में 'योगशत' से उद्धृत किया गया है। वहां इस पर निश्चलकर की व्याख्या निम्न प्रकार से है-

धात्रीत्यादि **अमितप्रभस्य**। धात्रीरसः आमलकस्वरसः, तदभावे क्वाथः। अन्ये तु कुष्ठप्रयोगे रसाञ्जनदर्शनाद् रसेनैव तदाहुः, तन्न, असम्प्रदायात्। **चन्द्रटस्तु** धात्रीफलमित्येवं पठति। सर्जरसो धूनकः। पाक्यो यवक्षारः, बिडलवणमिति **कर्ममाला**। आसुतः सन्धितः, सन्धानञ्च त्रिदिनम्, 'पूतिकृतं दिवसत्रयम्' (चक्रदत्त-कुष्ठचिकित्सा- ३८) इति योगान्तरदर्शनादिति।

(चक्रदत्त-रत्नप्रभा, कुष्ठचिकित्सा- २९, पृ. ६४४)

टिप्पणी- यहां 'पूतिकृत' पद से चक्रदत्त-कुष्ठचिकित्सा, श्लोक ३८ की ओर संकेत किया गया है, वह श्लोक इस प्रकार है-

एडगजातिलसर्षपकुष्ठं मागधिकालवणत्रयमस्तु।
पूतिकृतं दिवसत्रयमेतद्धन्ति विचर्चिकदद्रु सकुष्ठम्।।

एडगज (चकवड़), तिल, सरसों, कुष्ठ (कूठ), मागधिका (पिप्पली), सैन्धव लवण, कृष्ण लवण- इन्हें सम भाग में लेकर चूर्ण बनाएं। इसे मस्तु (दही के ताड़) में तीन दिन रखें। तदनन्तर इसका लेपन करने से विचर्चिका (खुजली), दद्रु (दाद) एवं सीप/कुष्ठ नष्ट हो जाते हैं।

दूर्वादि प्रलेप (योग सं.- ४३)

दूर्वाभया-सैन्धव-चक्रमर्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः।
त्रिभिः प्रलेपैरपि बद्धमूलां
दद्रूं च कण्डूं च विनाशयन्ति।।३६।।

---

योगशतम् ब.४ प्रतिलिपि, प्राच्यविद्या-मंदिर, बड़ोदा (गुजरात) - हस्तलेख क्र. ९०५९. (आद्यन्त भाग)



योगशतम् जै.-१. प्रतिलिपि, जिनभद्रसूरि हस्तलिखित ग्रन्थ भण्डार, जैसलमेर दुर्ग - ग्रन्थांक - २२२८. (प्रथम पृष्ठ)



योगशतम् जै. -१. प्रतिलिपि, जिनभद्रसूरि हस्तलिखित ग्रन्थ भण्डार, जैसलमेर दुर्ग - ग्रन्थांक - २२२८. (प्रथम पृष्ठ)

परिशिष्ट- ४.

योगशतम् (मूलपाठः)

(उपेन्द्रवज्रा छन्द १-२)

कृत्स्नस्य तन्त्रस्य गृहीतधाम्न-
शिचकित्सिताद्विप्रसृतस्य दूरम्।
विदग्धवैद्यप्रतिपूजितस्य
करिष्यते योगशतस्य बन्धः।।१।।

परीक्ष्य हेत्वामयलक्षणानि
चिकित्सितज्ञेन चिकित्सकेन।
निरामदेहस्य हि भेषजानि
भवन्ति युक्तान्यमृतोपमानि।।२।।

(वसन्ततिलका छन्द)

छिन्नोद्भवाम्बुधरधन्वयवासविश्वै-
र्दुःस्पर्शपर्प्पटकमेघकिराततिक्तैः।
मुस्ताटरूषकमहौषधधन्वयासैः
क्वाथं पिबेदनिलपित्तकफज्वरेषु ।।३।।

(वंशस्थ छन्द)

क्षुद्रामृतानागरपुष्कराह्वयैः
कृतः कषायः कफमारुतोत्तरे।
सश्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवेऽपि शस्यते।।४।।

(उपजाति छन्द ५-१४)

आरग्वधग्रन्थिकमुस्ततिक्ता-
हरीतकीभिः क्वथितः कषायः।
सामे सशूले कफवातयुक्ते
ज्वरे हितो दीपनपाचनश्च।।५।।

द्राक्षाभयापर्प्पटकाब्दतिक्ता-
क्वाथं सशम्याकफलं विदध्यात्।
प्रलापमूर्छाभ्रमदाहशोष-
तृष्णान्विते पित्तभवे ज्वरे च।।६।।

निदिग्धिकानागरकामृतानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम्।
जीर्णज्वरारोचककासशूल-
श्वासाग्निमान्द्यार्द्दितपीनसेषु।।७।।

दुरालभापर्प्पटकप्रियङ्गु-
भूनिम्बवासाकटुरोहिणीनाम्।
क्वाथं पिबेच्छर्करयावगाढं
तृष्णास्रपित्तज्वरदाहयुक्तः।।८।।

फलत्रिकं दारुनिशां विशालां
मुस्ताञ्च निष्क्वाथ्य निशांशकल्कम्।
पिबेत् कषायं मधुसम्प्रयुक्तं
सर्वप्रमेहेषु समुत्थितेषु।।९।।

सवत्सकः सातिविषः सबिल्वः
सोदीच्यमुस्तश्च कृतः कषायः।

सामे सशूले च सशोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे।।१०।।

शुण्ठीं समुस्तातिविषां गुडूचीं
पिबेज्जलेन क्वथितां समांशाम्।
मन्दानलत्वे सततामताया-
मामानुबन्धे ग्रहणीगदे च।।११।।

पुनर्नवादार्वभयागुडूचीः
पिबेत् समूत्रा महिषाक्षयुक्ताः।
त्वग्दोषशोफोदरपाण्डुरोग-
स्थौल्यप्रसेकोर्ध्वकफामयेषु।।१२।।

मुस्ताखुकर्णीफलदारुशिग्रु-
क्वाथः सकृष्णाकृमिशत्रुकल्कः।
मार्गद्वयेनापि चिरप्रवृत्तान्
कृमीन्निहन्यात् कृमिजांश्च रोगान्।।१३।।

एलोपकुल्यामधुकाश्मभेद-
कौन्तीश्वदंष्ट्रावृषकोरुबूकैः।
क्वाथं पिबेदश्मजतुप्रधानं
सशर्करे साश्मरिमूत्रकृच्छ्रे।।१४।।

(वसन्ततिलका छन्द)

एलाश्मभेदकशिलाजतुपिप्पलीनां
चूर्णानि तण्डुलजले लुलितानि पीत्वा।
यद्वा गुडेन सहितान्यवलिह्य सम्यग्-
आसन्नमृत्युरपि जीवति मूत्रकृच्छ्री।।१५।।

(उपजाति छन्द १६-१८)

हरीतकी-गोक्षुर-राजवृक्ष-
पाषाणभिद्धन्वयवासकानाम्।
क्वाथं पिबेन्माक्षिकसम्प्रयुक्तं
कृच्छ्रे सदाहे सरुजे विबन्धे।।१६।।

वासा-गुडूची-चतुरङ्गुलाना-
मैरण्डतैलेन पिबन् कषायम्।
क्रमेण सर्वाङ्गजमप्यशेषं
जयेदसृग्वातभवं विकारम्।।१७।।

रसाञ्जनं तन्दुलकस्य मूलं
क्षौद्रान्वितं तण्डुलतोयपीतम्।
असृग्दरं सर्वभवं निहन्ति
श्वासं च भार्गी सह नागरेण।।१८।।

(इन्द्रवज्रा छन्द)

एरण्ड-बिल्व-बृहतीद्वय-मातुलुङ्ग-
पाषाणभित्त्रिकटमूलकृतः कषायः।
सक्षारहिङ्गुलवणोरुबुतैलमिश्रः
श्रोण्यंस-मेढ्र-हृदय-स्तनरुक्षु पेयः।।१९।।

(उपजाति छन्द २०-२१)

चूर्णं समं रुचक-हिङ्गु-महौषधानां
शुण्ठ्यम्बुना कफसमीरणसम्भवासु।
हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु
पेयं तथा यवरसेन च विड्-विबन्धे।।२०।।

हिंगूग्रगन्धा-विड-शुण्ठ्यजाजी-
हरीतकी-पुष्करमूल-कुष्ठम्।
भागोत्तरं चूर्णितमेतदिष्टं
गुल्मोदराजीर्ण-विषूचिकासु।।२१।।

(वसन्ततिलका छन्द २२-२३)

पूतीकपत्र-गजचिर्भिट-चव्य-वह्नि-
व्योषं च संस्तरचितं लवणोपधानम्।
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं
गुल्मोदर-श्वयथु-पाण्डु-गुदोद्भवेषु।।२२।।

शृङ्गीकटुत्रिक-फलत्रय-कण्टकारी-
भार्गी सपुष्करजटा लवणानि पञ्च।
चूर्णं पिबेदशिशिरेण जलेन हिक्का-
श्वासोर्ध्ववातकसनारुचिपीनसेषु।।२३।।

(शार्दूलविक्रीडित छन्द)

नादेयी-कुटजार्क-शिग्रु-बृहती-स्नुग्-बिल्व-भल्लातक-
व्याघ्री-किंशुक-पारिभद्रक-जटापामार्ग-नीपाग्निकान्।
वासामुष्ककपाटलासलवणान् दग्ध्वा रसं पाचितं
हिंग्वादिप्रतिवापमेतदुचितं गुल्मोदराष्ठीलिषु।।२४।

(वसन्ततिलका छन्द २५-२७)

चव्याम्लवेतस-कटुत्रिक-तिन्तिडीक-
तालीस-जीरक-तुगा-दहनैः समांशैः।
चूर्णं गुडप्रमृदितं त्रिसुगन्धयुक्तं
वैस्वर्यपीनसकफारुचिषु प्रशस्तम्।।२५।।

तालीसचव्यमरिचं सदृशं द्विरंशां
मूलानुगां मगधजां त्रिगुणां च शुण्ठीम्।
कृत्वा गुडत्रिगुणितां गुटिकां सुगन्धां
कासाग्निसाद-गुदज-ज्वररुक्षु दद्यात्।।२६।।

शुण्ठी-कणा-मरिच-नागदल-त्वगेलं
चूर्णीकृतं क्रमविवर्धितमूर्ध्वमन्त्यात्।
खादेदिदं समसितं गुदजाग्निमान्द्य-
गुल्मारुचि-श्वसन-कण्ठहृदामयेषु।।२७।।

(इन्द्रवज्रा छन्द)

सिन्धूत्थहिङ्गुत्रिफलायवानी-
व्योषैर्गुडांशैर्गुडकान् प्रकुर्यात्।
तैर्भक्षितैस्तृप्तिमवाप्नुवन्ना
भुञ्जीत मन्दाग्निरपि प्रभूतम्।।२८।।

(उपजाति छन्द २९-३२)

गुडेन शुण्ठीमथवोपकुल्यां
पथ्यां तृतीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्चोविबन्धेषु च नित्यमद्यात्।।२९।।

अयस्तिलत्र्यूषणकोलभागैः
सर्वैः समं माक्षिकधातुचूर्णम्।
तैर्मोदकः क्षौद्रयुतोऽनुतक्रः
पाण्ड्वामये दूरगतेऽपि शस्तः।।३०।।

हरीतकी-नागरमुस्तचूर्णै-
गुडेन मिश्रैर्गुटिका विधेया।
निवारयत्यास्यविधारितेयं
श्वासं प्रवृद्धं प्रबलं च कासम्।।३१।।

मनश्शिलामागधिकोषणानां
चूर्णं कपित्थाम्लरसेन युक्तम्।
लाजैस्समांशं मधुनावलीढं
छर्दिं प्रवृद्धामसकृन्निहन्ति।।३२।।

(वंशस्थ छन्द)

वटप्ररोहं मधु कुष्ठमुत्पलं
सलाजचूर्णं गुटिकां प्रकल्पयेत्।
समाक्षिका सा वदने विधारिता
तृषं प्रवृद्धामपि हन्ति सत्वरम्।।३३।।

(उपजाति छन्द ३४-३६)

दूर्वारसो दाडिमपुष्पजो वा
घ्राणप्रवृत्तेऽसृजि नस्यमुक्तम्।
स्तन्येन वालक्तरसेन वापि
विण्मक्षिकाणां च निहन्ति हिक्काम्।।३४।।

धात्रीफलं सर्जरसः सपाक्यः
सौवीरपिष्टश्च तदासुतश्च।
भवन्ति सिध्मानि यथा न
भूयस्तथेदमुद्वर्त्तनकं करोति।।३५।।

दूर्वाभया-सैन्धव-चक्रमर्द-
कुठेरका: काञ्जिकतक्रपिष्टा:।
त्रिभि: प्रलेपैरपि बद्धमूलां
दद्रूं च कण्डूं च विनाशयन्ति।।३६।

(इन्द्रवज्रा छन्द)

गण्डीरिका-चित्रक-मार्कवार्क-
कुष्ठद्रुमत्वग्लवणै: समूत्रै:।
तैलं पचेन्मण्डलदद्रुकुष्ठ-
दुष्टव्रणारु:किटिभापहारि।।३७।।

(वसन्ततिलका छन्द)

सिन्दूर-गुग्गुलु-रसाञ्जन-सिक्थ-तुत्थै-
स्तुल्यांशकै: कटुकतैलमिदं विपक्वम्।
कच्छूं स्रवत्पिटकिकामथवा विशुष्का-
मभ्यञ्जनेन सकृदुद्धरति प्रसह्य।।३८।।

(उपजाति छन्द)

सुवर्चिका-नागर-कुष्ठ-मूर्वा-
लाक्षा-निशा-लोहितयष्टिकाभि:।
तैलं ज्वरे षड्गुणतक्रसिद्ध-
मभ्यञ्जनाच्छीतविदाहजित् स्यात्।।३९।।

(इन्द्रवज्रा छन्द)

सर्पिर्गुडूचीवृषकण्टकारी-
क्वाथेन कल्केन च सिद्धमेतत्।
पेयं पुराणज्वरकासशूल-
श्वासाग्निमान्द्यग्रहणीगदेषु।।४०।।

(पुष्पिताग्रा छन्द)

वृषखदिरपटोलनिम्बपत्र-
त्वगमृतामलकीकषायकल्कैः।
घृतमभिनवमेतदाशु पक्वं
जयति विसर्पमदास्रकुष्ठगुल्मान्।।४१।।

(मञ्जुभाषिणी छन्द)

अमृतापटोलपिचुमन्दधावनी-
त्रिफलाकरञ्जवृषकल्कवारिभिः।
घृतमुत्तमं विधिविपक्वमादृतः
प्रपिबन्निदं जयति कुष्ठमातुरः।।४२।।

(स्रग्धरा छन्द)

खण्डान् कूष्माण्डकानामथ पचनविधिस्विन्नशुष्काज्यभृष्टान्
न्यस्येत् खण्डे विपक्वे समरिचमगधा-शुण्ठ्यजाजी-त्रिगन्धैः।
लेहोऽयं बालवृद्धानिलरुधिरि-कृश-स्त्रीप्रसक्तिक्षतानां
तृष्णाकासास्रपित्तश्वसनगुदरुजाछर्दितानां च शस्तः।।४३।।

(उपजाति छन्द ४४-४९)

विपाच्य मूत्राम्लमधूनि दन्ती-
पिण्डीतकृष्णाबिडधूमकुष्ठैः।
वर्त्तिं कराङ्गुष्ठनिभां घृताक्तां
गुदे रुजानाहहरीं विदध्यात्।।४४।।

सशर्करं कुंकुममाज्यभृष्टं
नस्यं विधेयं पवनासृगुत्थे।
भ्रूकर्णशङ्खाक्षिशिरोऽर्द्धशूले
दिनाभिवृद्धिप्रभवे च रोगे।।४५।।

पथ्याक्षधात्रीफलमध्यबीजै-
त्रिद्व्येकभागैर्विदधीत वर्त्तिम्।
तयाञ्जयेत् तत्सपदि प्रवृद्ध-
मक्ष्णोर्जयेत् कष्टमपि प्रकोपम्।। ४६।।

हरीतकी-सैन्धव-ताक्ष्र्यशैलैः
सगैरिकैः स्वच्छजलेन पिष्टैः।
बहिः प्रलेपं नयनस्य कुर्यात्
सर्वाक्षिरोगप्रशमार्थमेतम्।।४७।।

ससैन्धवं लोध्रमथाज्यभृष्टं
सौवीरपिष्टं सितवस्त्रबद्धम्।
आश्च्योतनं तन्नयनस्य कुर्यात्
कण्डूञ्च दाहञ्च रुजञ्च हन्यात्।।४८।।

हन्त्यर्जुनं शर्करयाब्धिफेनो
नक्तान्धतां गोशकृता च कृष्णा।
रसाञ्जनं व्योषयुतं च पिल्लं
तापीसमुत्थं मधुना च शुक्लम्।।४९।।

(वसन्ततिलका छन्द)

पुष्पाख्य-ताक्ष्र्यज-सितोदधिफेनसर्ज-
सिन्धूत्थ-गैरिक-शिला-मरिचैः समांशैः।
पिष्टैस्तु माक्षिकरसेन रसक्रियेयं
हन्त्यन्धतां च तिमिरार्जुनवर्त्मरोगान्।।५०।।

(शार्दूलविक्रीडित छन्द ५१-५२)

मुस्तोशीररजो यवाः समरिचं सिन्धूद्भवं कट्फलम्।
दार्वीतुत्थकशङ्खफेननलदं कालानुसार्यञ्जनम्।
तुल्यं चूर्णितमायसे विनिहितं क्षौद्रान्वितं शस्यते
कण्ड्वर्म्मामयरक्तराजितिमिरे पिल्लोपदेहेषु च।।५१।।

मञ्जिष्ठा-मधुकोत्पलोदधिकफ-त्वक्-सेव्य-गोरोचना-
मांसी-चन्दन-शङ्खपत्र-गिरिमृत्तालीस-पुष्पाञ्जनैः।
सर्वैरेव समांशमनञ्जनमिदं शस्तं सदा चक्षुषोः
कण्डूक्लेदमलास्रशोणितरुजापिल्लार्मशुक्लापहम्।।५२।।

(उपजाति छन्द ५३-५५)

क्वाथः समुस्तातिविषेन्द्रदारु-
कलिङ्गपाठाकटुरोहिणीनाम्।
गोमूत्रसिद्धो मधुना च युक्तः
श्रेष्ठो गलव्याधिषु सर्वजेषु।।५३।।

यवाग्रजं तेजवतीं सपाठां
रसाञ्जनं दारुनिशां सकृष्णाम्।
क्षौद्रेण कुर्याद् गुटिकां मुखेन
तां धारयेत् सर्वगलामयेषु।।५४।।

दार्वीगुडूचीसुमनःप्रवाल-
द्राक्षा-यवानी-त्रिफलाकषायः।
क्षौद्रेण युक्तः कवलग्रहोऽयं
मुखस्य पाकं शमयत्युदीर्णम्।।५५।।

(शालिनी छन्द)

कुष्ठं दार्वी लोध्रमब्दं समङ्गा
पाठा तिक्ता तेजनी पीतिका च।
चूर्णं शस्तं घर्षणं तद् द्विजानां
रक्तस्रावं हन्ति कण्डूरुजश्च।।५६।।

(इन्द्रवज्रा छन्द)

सौवीर-शुक्तार्द्रक-मातुलुङ्ग-
मांसीरसैर्गुग्गुलुसैन्धवैश्च।
पक्त्वा च तैलं कटुकं निषिञ्चेत्
तत्कर्णयोः कर्णरुजोपशान्त्यै।।५७।।

(शार्दूलविक्रीडित छन्द ५८-५९)

वासानिम्बपटोलपर्पटफलश्रीमुस्तदार्व्यम्बुदै-
स्तिक्तोशीरदुरालभा-त्रिकटुक-त्रायन्तिकाचन्दनैः।
सर्पिः सिद्धमथोर्ध्वजत्रुविकृतिघ्राणाक्षिशूलादिषु
त्वग्दोषे ज्वरविद्रधिव्रणरुजाशुक्रेषु चैवेष्यते।।५८।।

दार्वीपर्प्पटनिम्बवत्सककणादुःस्पर्शयष्टिवृषा-
स्त्रायन्तीत्रिफलापटोलकटुकाभूनिम्बरक्ताम्बुदाः।
एषां कल्ककषायसाधितमिदं सर्पिः प्रशस्तं दृशः
पित्तासृक्प्रभवेषु सर्वतिमिरेषूर्ध्वेषु च व्याधिषु।।५९।।

(मत्तमयूर छन्द)

शुक्लैरण्डान्मूलमथोग्रा शतपुष्पा
पुष्पोद्भूतं यच्च बृहत्यास्तगरञ्च।
पक्वं तैलं तैः सपयस्कैस्तिमिरघ्नं
नस्यं श्रेष्ठं व्याधिषु चोर्ध्वेष्वपरेषु।।६०।।

(शार्दूलविक्रीडित छन्द)

क्वाथे मुष्ककभस्मनोऽनलशिखादग्धं क्षिपेच्छङ्खकं
तत्तेनैव पुनर्जलेन विपचेत् क्षारं स तैले विधि:।
युञ्ज्यात्तद् व्रणदुष्टिषु व्रणरुजास्वर्शस्सु नाडीषु च
त्वग्दोषेषु भगन्दरे च विविधे कण्ठामये च स्थिरे।।६१।।

(वंशस्थ छन्द)

निशा सयष्टीमधुपद्मकोत्पलै:
प्रियङ्गुकाशाबरलोध्रचन्दनै:।
विपाच्य तैलं पयसा प्रयोजयेत्
क्षतेषु संरोहणदाहनाशनम्।।६२।।

(शार्दूलविक्रीडित छन्द)

जातीनिम्बपटोलपत्रकटुका-दार्वीनिशासारिवा-
मञ्जिष्ठाभयसिक्थतुत्थमधुकैर्नक्ताह्वबीजै: समै:।
सर्पि: सिद्धमनेन सूक्ष्मवदना मर्माश्रिता: स्राविणो
गम्भीरा: सरुजो व्रणा: सगतिका: शुध्यन्ति रोहन्ति च।।६३।।

(वंशस्थ छन्द)

शिरीषपुष्पस्वरसेन भावितं
त्रिसप्तकृत्वो मरिचं सिताह्वयम्।
प्रयोजयेदञ्जन-पान-नावनै-
र्विमोहितानामपि सर्पदंशिनाम्।।६४।।

(इन्द्रवज्रा छन्द)

तैलं तिलानां पललं गुडं च
क्षीरं तथार्कं सममेव पीतम्।
आलर्कमुग्रं विषमाशु हन्ति
सद्योद्भवं वायुरिवाभ्रवृन्दम्।।६५।।

(उपजाति छन्द ६६-६७)

मयूरपित्तेन च तण्डुलीयं
काकाण्डयुक्तं प्रपिबेदनल्पम्।
विषाण्यसौ स्थावरजङ्गमानि
सोपद्रवाण्यप्यचिरेण हन्ति।।६६।।

आगारधूमो महिषाक्षयुक्तः
सवाजिगन्धोऽन्विततण्डुलीयः।
गोमूत्रपिष्टो ह्यगदो निहन्ति
विषाणि सस्थावरजङ्गमानि।।६७।।

(स्रग्धरा छन्द)

मांसीसेव्यालकौन्तीजलजलदशिलारोचनापद्मकेशी-
स्पृक्काचण्डाहरिद्रागदसितपलितासृग्लतापद्मकैलाः।
तुल्यं गौराष्टभागाश्चतुरिभकुसुमा वर्त्तयः सर्वयोग्याः
कृत्याऽलक्ष्मीपिशाचज्वरविषमगरान्घ्नन्ति चन्द्रोदयाख्याः।।६८।।

(शार्दूलविक्रीडित छन्द ६९-७०)

सिद्धार्थत्रिफलाशिरीषकटभीश्वेताकरञ्जामरं
मञ्जिष्ठा रजनीद्वयं त्रिकटुकं श्यामावचाहिङ्गु च।
शस्तं छागलमूत्रपिष्टमगदं सर्वग्रहोच्चाटनं
कृत्योन्मादविषज्वरप्रशमनं पानादिभिर्योजितम्।।६९।।

कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिण्डीतकै-
स्त्वग्वांशीवृकदंशविट्तुषवचाकेशाहिनिर्मोचनैः।
नागेन्द्रद्विजशृङ्गहिङ्गुमरिचैस्तुल्यैश्च धूपः कृतः
स्कन्दोन्मादपिशाचराक्षससुरावेशज्वरघ्नः स्मृतः।।७०।।

(दण्डक- चण्डवृष्टिप्रपात छन्द)

त्रिकटुकदलकुङ्कुमग्रन्थिकक्षारसिंही-
निशादारुसिद्धार्थयुग्माम्बुशक्राह्वयैः।
सितलशुनफलत्रिकोशीरतिक्तावचा-
तुत्थयष्टीबलालोहितैलाशिलापद्मकैः।।
दधितगरमधूकसारप्रियाह्वाविषाख्याविषा-
तार्क्ष्यशैलैः सचव्यामयैः कल्कितैः।
घृतमनवमशेषमूत्रांशसिद्धं मतं भूतरावाह्वयं
पानतस्तद् ग्रहघ्नं परम्।।७१।।

(दण्डक- व्याल छन्द)

नतमधुककरञ्जलाक्षापटोलीसमङ्गावचापाटली-
हिङ्गुसिद्धार्थसिंहीनिशायुग्लतारोहिणी-
बदरकटुफलत्रिकाकाण्डदारुकृमिघ्नाजगन्धामरा-
ङ्कोलकोशातकीशिग्रुनिम्बाम्बुदेन्द्राह्वयैः।
गदशुकतरुपुष्पबीजाम्बुयष्ट्यद्रिकर्णीनिकुम्भाग्नि-
बिल्वैः समैः कल्कितैर्मूत्रवर्गेण सिद्धं घृतं
चिरविनिहितमाशु सर्वैः क्रमैर्योजितं हन्ति सर्व-
ग्रहोन्मादकुष्ठज्वरांस्तन्महाभूतरावं स्मृतम्।।७२।।

(इन्द्रवज्रा छन्द)

दार्वी हरिद्रा कुटजस्य बीजं
शृङ्गी च यष्टीमधुकं च तुल्यम्।
क्वाथः शिशोः स्तन्यकृते च दोषे
सर्वातिसारेषु च सर्वदेष्टः।।७३।।

(उपजाति छन्द ७४-७५)

बिल्वं च पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च।
क्वाथावलेहौ मधुना प्रशस्तौ
बालेषु योज्यावतिसारितेषु।।७४।।

शृङ्गीं सकृष्णातिविषां विचूर्ण्य
लेहं विदध्यान्मधुना शिशूनाम्।
कासज्वरच्छर्दिभिरर्दितानां
समाक्षिकां चातिविषामथैकाम्।।७५।।

(स्रग्धरा छन्द)

धात्रीचूर्णस्य कंसं स्वरसपरिगतं क्षौद्रसर्पि:समांशं
कृष्णामानीसिताष्टप्रसृतिसमयुतं स्थापितं धान्यराशौ।
वर्षान्ते तत्समश्नन् भवति विपलितो रूपवर्णप्रभावा-
न्निर्व्याधिर्बुद्धिमेधास्मृतिवचनबलस्थैर्यसत्त्वैरुपेत:।।७६।।

(वियोगिनी छन्द)

मधुकं मधुना घृतेन च प्रलिहन् क्षीरमनु प्रयोजयेत्।
लभतेऽपि च नात्मन: क्षयं प्रमदानां प्रियतां च गच्छति।।७७।।

(उपजाति छन्द ७८-८१)

यष्टीतुगासैन्धवपिप्पलीभि:
सशर्कराभिस्त्रिफला प्रयुक्ता।
आयु:प्रदा वृष्यतमातिमेध्या
भवेज्जराव्याधिविनाशनी च।।७८।।

चूर्णं श्वदंष्ट्रामलकाऽमृतानां
लिहन् ससर्पिर्मधुभागयुक्तम्।
वृष्यः स्थिरः शान्तविकारदुःखः
समाः शतं जीवति कृष्णकेशः।।७९।।

यष्टीकषायो लवणाग्र्ययुक्तः
कलिङ्गकृष्णाफलकल्कमिश्रः।
सक्षौद्रमेतद् वमनं प्रयोज्यं
कण्ठामयास्यश्रवणामयेषु।।८०।।

हरीतकीभिः क्वथितं सुवीरं
दन्त्यर्द्धकृष्णाविडचूर्णयुक्तम्।
विरेचनं सोरुबुतैलमेत-
न्निरत्ययं योज्यमथामयघ्नम्।।८१।।

(शार्दूलविक्रीडित छन्द)

रास्नाराठफलत्रयामृतलतायुक्पञ्चमूलीबला-
माषक्वाथयुतः सतैललवणक्षौद्रः ससर्पिर्गुडः।
पुष्पाह्वाघनबिल्वकुष्ठफलिनीकृष्णावचाकल्कितो
वस्तिः काञ्जिकदुग्धमूत्रसहितो वातामयेभ्यो हितः।।८२।।

(वसन्ततिलका छन्द)

तैलं बलाक्वथनकल्कसुगन्धिगर्भं
सिद्धं पयोदधितुषोदकमस्तुचुक्रैः।
तद्वत्सहाचरसरण्यमृतावरीभिः
प्रत्येकपक्वमनुवासनमीरणघ्नम्।।८३।।

(उपजाति छन्द ८४-८५)

नस्यं विदध्याद् गुडनागरं वा
ससैन्धवां मागधिकामथो वा।
घ्राणास्यमन्याहनुबाहुपृष्ठ-
शिरोऽक्षिरोगश्रवणामयेषु।।८४।।

इत्येते विधिविहिताः प्रसिद्धयोगाः
सिद्ध्यर्थं विनिगदिता भिषग्वराणाम्।
दृष्ट्वैतान् कथमचिकित्सकोऽपि युञ्ज्या-
दित्यर्थः पुनरपि वक्ष्यतेऽत्र किञ्चित्।।८५।।

(वसन्ततिलका छन्द ८६-८८)

सन्धारणाध्यशनजागरणोच्चभाष्य-
व्यायामयानकटुतिक्तकषायरूक्षैः।
चिन्ताव्यवायभयलङ्घनशोकशीतै-
र्वायुः प्रकोपमुपयाति घनागमे च।।८६।।

कट्वम्लमद्यलवणोष्णविदाहितीक्ष्णैः
क्रोधातपानलपरिश्रमशुष्कशाकैः
क्षारैरजीर्णविषमाशनसेवनैश्च
पित्तं प्रकोपमुपयाति घनात्यये च।।८७।।

स्वप्नाद्दिवामधुरशीतलमत्स्यमांसै-
र्गुर्वम्लपिच्छिलतिलेक्षुपयोविकारैः।
स्निग्धातितृप्तिलवणोदकपानभक्षैः
श्लेष्मा प्रकोपमुपयाति तथा वसन्ते।।८८।।

(उपजाति छन्द ८९-९२)

त एवमेते क्रमशो द्विशो वा
दोषाः प्रवृद्धा युगपत्त्रयो वा
कुर्वन्ति रोगान् विविधान् शरीरे
संख्यानसञ्ज्ञातिगताननेकान्।।८९।।

पारुष्य-सङ्कोचन-तोद-शूल-
श्यामत्व-पाण्डुत्वमथाङ्गपीडाः।।
सुप्तत्व-शीतत्व-खरत्व-शोषान्
कर्माणि वायोः प्रवदन्ति तज्ज्ञाः।।९०।।

परिश्रमस्वेदविदाहराग-
वैगन्ध्यसंक्लेदविपाककोपान्।
प्रलापमूर्छाभ्रमपीतभावान्
पित्तस्य कर्माणि विदन्ति तज्ज्ञाः।।९१।।

श्वेतत्वशीततत्वगुरुत्वकण्डू-
स्नेहोपदेहस्तिमितत्वलेपान्।
उत्सेधसंघातचिरक्रियाश्च
कफस्य कर्माणि वदन्ति तज्ज्ञाः।।९२।।

(इन्द्रवज्रा छन्द)

एतानि लिङ्गानि च तत्कृतानां
सर्वामयानामपि नैकनाम्नाम्।
कश्चिद् भवेत् प्राप्तिविशेष एषां
सञ्ज्ञान्तरं येन तु सम्प्रयान्ति।।९३।।

(उपजाति छन्द ९४-९५)

आलस्यतन्द्राहृदयाविशुद्धि-
दोषाप्रवृत्त्याकुलमूत्रताभिः।
गुरूदरत्वारुचिसुप्तताभि-
रामान्वितं व्याधिमुदाहरन्ति।।९४।।

आमं जयेल्लङ्घनकोलपेया-
लघ्वन्नसूपौदनतिक्तयूषैः।
विरूक्षण-स्वेदन-पाचनैश्च
संशोधनैरूर्ध्वमधस्तथा च।।९५।।

(शार्दूलविक्रीडित छन्द ९६-९८)

स्निग्धोष्णस्थिरवृष्यबल्यलवणस्वाद्वम्लतैलातपः-
स्नानाभ्यञ्जनबस्तिमांसमदिरासंवाहनोन्मर्दनम्।
स्नेहस्वेदनिरूहनस्यशयनस्थानोपनाहादिकं
पानाहारविहारभेषजमिदं वातं प्रशान्तिं नयेत्।।९६।।

तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनं
ज्योत्स्नाभूगृहयन्त्रवारिजलजस्त्रीगात्रसंस्पर्शनम्।
सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं
पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत्।।९७।।

रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनं
स्त्रीसेवाध्वनियुद्धजागरजलक्रीडापदाघातनम्।
धूमात्युष्णशिरोविरेकवमनस्वेदोपवासादिकं
पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत्।।९८।।

(उपजाति छन्द ९९-१००)

कफप्रकोपे वमनं सनस्यं
विरेचनं पित्तभवे विकारे।
वातात्मके वस्तिमुदाहरन्ति
संसर्गजे तु व्यतिमिश्रमेतत्।।९९।।

हेमन्तवर्षाशिशिरेषु वायोः
पित्तस्य वर्षान्तनिदाघयोश्च।
कफस्य कोपः कुसुमागमे च
कुर्वीत यद्यद्विहितं यथैषाम्।।१००।।

(वसन्ततिलका छन्द)

वातोऽम्लतैललवणैर्मधुरान्नपानैः
पित्तं तथा मधुरतिक्तकषायशीतैः।
श्लेष्मापि तिक्तकटुरूक्षकषायतीक्ष्णै-
रामः प्रशान्तिमुपयात्यपतर्पणेन।।१०१।।

बुद्ध्वैतदन्यदपि यद्यदनुक्तमत्र
युक्त्या स्वयं समधिगम्य यथानुरूपम्।
रोगेषु भेषजमनल्पमतिर्विदध्यात्
शास्त्रं हि किञ्चिदुपदेशबलं करोति।।१०२।।

(उपजाति छन्द)

गुणाधिकं योगशतं निबध्य
प्राप्तं मया पुण्यमनुत्तमं यत्।
नानाप्रकारामयनीडभूतं
कृत्स्नं जगत्तेन भवत्वरोगम्।।१०३।।

।। इति अमितप्रभ-विरचितं योगशतं सम्पूर्णम्।।

परिशिष्ट-५.

योगशत में प्रयुक्त छन्द

इन्द्रवज्रा- (७) २८, ३७, ४०, ५७, ६५, ७३, ९३,

स्यादिन्द्रवज्रा यदि तौ जगौ गः। (वृत्तरत्नाकर- ३.२८)

उपेन्द्रवज्रा- (२) १, २;

उपेन्द्रवज्रा जतजास्ततो गौ। (वृत्तरत्नाकर- ३.२९)

उपजाति- (५१) ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १६, १७, १८, १९,२०, २१, २९, ३०, ३१, ३२, ३४, ३५, ३६, ३९, ४४, ४५, ४६, ४७, ४८, ४९, ५३, ५४, ५५, ६६, ६७, ७४, ७५, ७८, ७९, ८०, ८१, ८४, ८९, ९०, ९१, ९२, ९४, ९५, ९९, १००, १०३;

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।

(वृत्तरत्नाकर- ३.३०)

दण्डक- (चण्डवृष्टिप्रपात) (१) ७१;

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूत-
लीलाकरोद्दामशङ्खादयः।। (वृत्तरत्नाकर- ३.११३)

दण्डक (व्याल)- (१) ७२;

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूत-
लीलाकरोद्दामशङ्खादयः। (वृत्तरत्नाकर- ३.११३)

पुष्पिताग्रा- (१) ४१; अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा। (वृत्तरत्नाकर- ४.१०)

प्रहर्षिणी- (१) ८५; म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्।

(वृत्तरत्नाकर- ३.७०)

मञ्जुभाषिणी- (१) ४२; सजसा जगौ भवति मञ्जुभाषिणी।
(वृत्तरत्नाकर- ३.७४)

मत्तमयूरम्- (१) ६०; वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम्।
(वृत्तरत्नाकर- ३.७२)

वंशस्थ- (४) ४, ३३, ६२, ६४;
जतौ तु वंशस्थमुदीरितं जरौ। (वृत्तरत्नाकर- ३.४६)

वसन्ततिलका- (१५) ३, १५, २२, २३, २५, २६, २७, ३८, ५०, ८३, ८६, ८७, ८८, १०१, १०२;
उक्ता वसन्ततिलका तभजा जगौ गः। (वृत्तरत्नाकर- ३.७९)

वियोगिनी- (१) ७७; विषमे ससजा गुरुः समे सभरा लोऽथ गुरुर्वियोगिनी।

शार्दूलविक्रीडितम्- (१३) २४, ५१, ५२, ५८, ५९, ६१, ६३, ६९, ७०, ८२, ९६, ९७, ९८,
सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।
(वृत्तरत्नाकर- ३.१०१)

शालिनी- (१) ५६; शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः।
(वृत्तरत्नाकर- ३.३४)

स्रग्धरा- (३) ४३, ६८, ७६;
म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।
(वृत्तरत्नाकर- ३.१०४)

सकल पद्य संख्या-१०३;

।। इति योगशत-गत-छन्दोविवरणम्।।

परिशिष्ट- ६.

योगशत-श्लोकचरणानुक्रमणिका

यहां योगशतीय पद्यों के चारों चरणों की अनुक्रमणिका प्रस्तुत की जा रही है। प्रथम चरण गाढ अक्षरों में मुद्रित किया गया है।

अमृतापटोलपिचुमन्दधावनी- ४२.१
अयस्तिलत्र्यूषणकोलभागै: ३०.१
असृग्दरं सर्वभवं निहन्ति १८.३
आगारधूमो महिषाक्षयुक्त: ६७.१
आमं जयेल्लङ्घनकोलपेया- ९५.१
आमेष्वजीर्णेषु गुदामयेषु २९.३
आयु:प्रदा वृष्यतमातिमेध्या ७८.३
आरग्वधग्रन्थिकमुस्ततिक्ता- ५.१
आलर्कमुग्रं विषमाशु हन्ति ६५.३
आलस्यतन्द्राहृदयाविशुद्धि- ९४.१
आश्च्योतनं तन्नयनस्य कुर्यात् ४८.३
आसन्नमृत्युरपि जीवति मूत्रकृच्छ्री १५.४
इत्येते विधिविहिता: प्रसिद्धयोगा: ८५.१
उत्सेधसंघातचिरक्रियाश्च ९२.३
एतानि लिङ्गानि च तत्कृतानां ९३.१
एरण्ड-बिल्व-बृहतीद्वय-मातुलुङ्ग- १९.१
एलाश्मभेदकशिलाजतुपिप्पलीनां १५.१
एलोपकुल्यामधुकाश्मभेद- १४.१

एषां कल्ककषायसाधितमिदं सर्पिः प्रशस्तं दृशः	५९.३
कच्छूं स्रवत्पिटकिकामथवा विशुष्का-	३८.३
कट्वम्लमद्यलवणोष्णविदाहितीक्ष्णैः	८७.१
कण्ठामयास्यश्रवणामयेषु	८०.४
कण्डूञ्च दाहञ्च रुजञ्च हन्यात्	४८.४
कण्डूक्लेदमलास्रशोणितरुजापिल्लार्मशुक्लापहम्	५२.४
कण्ड्वर्म्मामयरक्तराजितिमिरे पिल्लोपदेहेषु च	५१.४
कफप्रकोपे वमनं सनस्यं	९९.१
कफस्य कर्माणि वदन्ति तज्ज्ञाः	९२.४
कफस्य कोपः कुसुमागमे च	१००.३
करिष्यते योगशतस्य बन्धः	१.४
कर्माणि वायोः प्रवदन्ति तज्ज्ञाः	९०.४
कलिङ्गकृष्णाफलकल्कमिश्रः	८०.२
कलिङ्गपाठाकटुरोहिणीनाम्	५३.२
कश्चिद् भवेत् प्राप्तिविशेष एषां	९३.३
काकाण्डयुक्तं प्रपिबेदनल्पम्	६६.२
कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिण्डीतकै-	७०.१
कासज्वरच्छर्दिभिरर्दितानां	७५.३
कासाग्निसाद-गुदज-ज्वररुक्षु दद्यात्	२६.४
कुठेरकाः काञ्जिकतक्रपिष्टाः	३६.२
कुर्वन्ति रोगान् विविधान् शरीरे	८९.३
कुर्वीत यद्यद्विहितं यथैषाम्	१००.४
कुष्ठं दार्वी लोध्रमब्दं समङ्गा	५६.१
कुष्ठद्रुमत्वग्लवणैः समूत्रैः	३७.२
कृच्छ्रे सदाहे सरुजे विबन्धे	१६.४

कृतः कषायः कफमारुतोत्तरे ४.२
कृत्याऽलक्ष्मीपिशाचज्वरविषमगराघ्नन्ति चन्द्रोदयाख्याः ६८.४
कृत्योन्मादविषज्वरप्रशमनं पानादिभिर्योजितम् ६९.४
कृत्वा गुडत्रिगुणितां गुटिकां सुगन्धां २६.३
कृत्स्नं जगत्तेन भवत्वरोगम् १०३.४
कृत्स्नस्य तन्त्रस्य गृहीतधाम्न- १.१
कृमीन्निहन्यात् कृमिजांश्च रोगान् १३.४
कृष्णामानीसिताष्टप्रसृतिसमयुतं स्थापितं धान्यराशौ ७६.२
कौन्तीश्वदंष्ट्रावृषकोरुबूकैः १४.२
क्रमेण सर्वाङ्गजमप्यशेषं १७.३
क्रोधातपानलपरिश्रमशुष्कशाकैः ८७.२
क्वाथं पिबेच्छर्करयावगाढं ८.३
क्वाथं पिबेदनिलपित्तकफज्वरेषु ३.४
क्वाथं पिबेदशमजतुप्रधानं १४.३
क्वाथं पिबेन्माक्षिकसम्प्रयुक्तं १६.३
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ७.२
क्वाथं सशम्याकफलं विदध्यात् ६.२
क्वाथः शिशोः स्तन्यकृते च दोषे ७३.३
क्वाथः सकृष्णाकृमिशत्रुकल्कः १३.२
क्वाथः समुस्तातिविषेन्द्रदारु- ५३.१
क्वाथावलेहौ मधुना प्रशस्तौ ७४.३
क्वाथे मुष्ककभस्मनोऽनलशिखादग्धं क्षिपेच्छङ्खकं ६१.१
क्वाथेन कल्केन च सिद्धमेतत् ४०.२
क्षतेषु संरोहणदाहनाशनम् ६२.४
क्षारैरजीर्णविषमाशनसेवनैश्च ८७.३

क्षीरं तथार्कं सममेव पीतम् ६५.२

क्षुद्रामृतानागरपुष्कराह्वयैः ४.१

क्षौद्रान्वितं तण्डुलतोयपीतम् १८.२

क्षौद्रेण कुर्याद् गुटिकां मुखेन ५४.३

क्षौद्रेण युक्तः कवलग्रहोऽयं ५५.३

खण्डान् कूष्माण्डकानामथ पचनविधिस्विन्नशुष्काज्यभृष्टान् ४३.१

खादेदिदं समसितं गुदजाग्निमान्द्य- २७.३

गण्डीरिका-चित्रक-मार्कवार्क- ३७.१

गदशुकतरुपुष्पबीजाम्बुयष्ट्यद्रिकर्णीनिकुम्भाग्नि- ७२.३

गम्भीराः सरुजो व्रणाः सगतिकाः शुध्यन्ति रोहन्ति च ६३.४

गुडेन मिश्रैर्गुटिका विधेया ३१.२

गुडेन शुण्ठीमथवोपकुल्यां २९.१

गुणाधिकं योगशतं निबध्य १०३.१

गुदे रुजानाहहरीं विदध्यात् ४४.४

गुरूदरत्वारुचिसुप्तताभि- ९४.३

गुर्वम्लपिच्छिलतिलेक्षुपयोविकारैः ८८.२

गुल्मारुचि-श्वसन-कण्ठहृदामयेषु २७.४

गुल्मोदर-श्वयथु-पाण्डु-गुदोद्भवेषु २२.४

गुल्मोदराजीर्ण-विषूचिकासु २१.४

गोमूत्रपिष्टो ह्यगदो निहन्ति ६७.३

गोमूत्रसिद्धो मधुना च युक्तः ५३.३

घृतमभिनवमेतदाशु पक्वं ४१.३

घृतमुत्तमं विधिविपक्वमादृतः ४२.३

घ्राणप्रवृत्तेऽसृजि नस्यमुक्तम् ३४.२

घ्राणास्यमन्याहनुबाहुपृष्ठ- ८४.३

चव्याम्लवेतस-कटुत्रिक-तिन्तिडीक- २५.१
चिकित्सितज्ञेन चिकित्सकेन २.२
चिन्ताव्यवायभयलङ्घनशोकशीतैः ८६.३
चिरप्रवृत्तेऽपि हितोऽतिसारे १०.४
चिरविनिहितमाशु सर्वैः क्रमैर्योजितं हन्ति सर्व- ७२.४
चूर्णं पिबेदशिशिरेण जलेन हिक्का- २३.३
चूर्णं कपित्थाम्लरसेन युक्तम् ३२.२
चूर्णं गुडप्रमृदितं त्रिसुगन्धयुक्तं २५.३
चूर्णं शस्तं घर्षणं तद् द्विजानां ५६.३
चूर्णं श्वदंष्ट्रामलकाऽमृतानां ७९.१
चूर्णं समं रुचक-हिङ्गु-महौषधानां २०.१
चूर्णीकृतं क्रमविवर्धितमूर्ध्वमन्त्यात् २७.२
चूर्णानि तण्डुलजले लुलितानि पीत्वा १५.२
छर्दिं प्रवृद्धामसकृन्निहन्ति ३२.४
छिन्नोद्भवाम्बुधरधन्वयवासविश्वैः- ३.१
जयति विसर्पमदास्रकुष्ठगुल्मान ४१.४
जयेदसृग्वातभवं विकारम् १७.४
जलं सलोध्रं गजपिप्पली च ७४.२
जातीनिम्बपटोलपत्रकटुका-दार्वीनिशासारिवा- ६३.१
जीर्णज्वरारोचककासशूल- ७.३
ज्योत्स्नाभूगृहयन्त्रवारिजलजस्त्रीगात्रसंस्पर्शनम् ९७.२
ज्वरे त्रिदोषप्रभवेऽपि शस्यते ४.४
ज्वरे हितो दीपनपाचनश्च ५.४
त एवमेते क्रमशो द्विशो वा ८९.१
तत्कर्णयोः कर्णरुजोपशान्त्यै ५७.४

तत्तेनैव पुनर्जलेन विपचेत् क्षारं स तैले विधिः	६१.२
तद्वत्सहाचरसरण्यमृतावरीभिः	८३.४
तयाञ्जयेत् तत्सपदि प्रवृद्ध-	४६.३
तां धारयेत् सर्वगलामयेषु	५४.४
तापीसमुत्थं मधुना च शुक्लम्	४९.४
तालीसचव्यमरिचं सदृशं द्विरंशां	**२६.१**
तालीस-जीरक-तुगा-दहनैः समांशैः	२५.२
तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनं	**९७.१**
तुल्यं गौराष्टभागाश्चतुरिभकुसुमा वर्त्तयः सर्वयोग्याः	६८.३
तुल्यं चूर्णितमायसे विनिहितं क्षौद्रान्वितं शस्यते	५१.३
तुल्यांशकैः कटुकतैलमिदं विपक्वम्	३८.२
तृषं प्रवृद्धामपि हन्ति सत्वरम्	३३.४
तृष्णास्रपित्तज्वरदाहयुक्तः	८.४
तृष्णाकासास्रपित्तश्वसनगुदरुजां छर्दितानां च शस्तः	४३.४
तृष्णान्विते पित्तभवे ज्वरे च	६.४
तैर्भक्षितैस्तृप्तिमवाप्नुवन्ना	२८.३
तैर्मोदकः क्षौद्रयुतोऽनुतक्रः	३०.३
तैलं ज्वरे षड्गुणतक्रसिद्ध-	३९.३
तैलं तिलानां पललं गुडं च	**६५.१**
तैलं पचेन्मण्डलदद्रुकुष्ठ-	३७.३
तैलं बलाक्वथनकल्कसुगन्धिगर्भं	**८३.१**
त्रायन्ती त्रिफलापटोलकटुकाभूनिम्बरक्ताम्बुदाः	५९.२
त्रिकटुकदलकुङ्कुमग्रन्थिकक्षारसिंही-०	**७१.१**
त्रिद्व्येकभागैर्विदधीत वर्त्तिम्	४६.२
त्रिफलाकरञ्जवृषकल्कवारिभिः	४२.२

त्रिभिः प्रलेपैरपि बद्धमूलां ३६.३
त्रिसप्तकृत्वो मरिचं सिताह्वयम् ६४.२
त्वगमृतामलकीकषायकल्कैः ४१.२
त्वग्दोषशोफोदरपाण्डुरोग- १२.३
त्वग्दोषे ज्वरविद्रधिव्रणरुजाशुक्रेषु चैवेष्यते ५८.४
त्वग्दोषेषु भगन्दरे च विविधे कण्ठामये च स्थिरे ६१.४
दग्ध्वा विचूर्ण्य दधिमस्तुयुतं प्रयोज्यं २२.३
दद्रूं च कण्डूं च विनाशयन्ति ३६.४
दधितगरमधूकसारप्रियाह्वाविषाख्याविषा-० ७१.३
दन्त्यर्द्धकृष्णाविडचूर्णयुक्तम् ८१.२
दार्वी हरिद्रा कुटजस्य बीजं ७३.१
दार्वीगुडूचीसुमनःप्रवाल- ५५.१
दार्वीतुत्थकशङ्खफेननलदं कालानुसार्यञ्जनम् ५१.२
दार्वीपर्प्पटनिम्बवत्सककणादुःस्पर्शयष्टिवृषाः- ५९.१
दित्यर्थः पुनरपि वक्ष्यतेऽत्र किञ्चित् ८५.४
दिनाभिवृद्धिप्रभवे च रोगे ४५.४
दुःस्पर्शपर्प्पटकमेघकिराततिक्तैः ३.२
दुरालभापर्प्पटकप्रियङ्गु- ८.१
दुष्टव्रणारुःकिटिभापहारि ३७.४
दूर्वाभया-सैन्धव-चक्रमर्द- ३६.१
दूर्वारसो दाडिमपुष्पजो वा ३४.१
दोषाः प्रवृद्धा युगपत्त्रयो वा ८९.२
दोषाप्रवृत्त्याकुलमूत्रताभिः ९४.२
दृष्ट्वैतान् कथमचिकित्सकोऽपि युञ्ज्या- ८५.३
द्राक्षाभयापर्प्पटकाब्दतिक्ता- ६.१

द्राक्षा-यवानी-त्रिफलाकषाय: ५५.२

धात्रीचूर्णस्य कंसं स्वरसपरिगतं क्षौद्रसर्पि:समांशं ७६.१

धात्रीफलं सर्जरस: सपाक्य: ३५.१

धूमात्युष्णशिरोविरेकवमनस्वेदोपवासादिकं १८.३

नक्तान्धतां गोशकृता च कृष्णा ४९.२

नतमधुककरञ्जलाक्षापटोलीसमङ्गावचापाटली- ७२.१

नस्यं विदध्याद् गुडनागरं ८४.१

नस्यं विधेयं पवनासृगुत्थे ४५.२

नस्यं श्रेष्ठं व्याधिषु चोर्ध्वेष्वपरेषु ६०.४

नागेन्द्रद्विजशृङ्गहिङ्गुमरिचैस्तुल्यैश्च धूप: कृत: ७०.३

नादेयी-कुटजार्क-शिग्रु-बृहती-स्नुग्-बिल्व-भल्लातक २४.१

नानाप्रकारामयनीडभूतं १०३.३

निदिग्धिकानागरकामृतानां ७.१

निरामदेहस्य हि भेषजानि २.३

निवारयत्यास्यविधारितेयं ३१.३

निशा सयष्टीमधुपद्मकोत्पलै: ६२.१

न्निरत्ययं योज्यमथामयघ्नम् ८१.४

न्निर्व्याधिर्बुद्धिमेधास्मृतिवचनबलस्थैर्यसत्त्वैरुपेत: ७६.४

न्यस्येत् खण्डे विपक्वे समरिचमगधा-शुण्ठ्यजाजी-त्रिगन्धै: ४३.२

पक्त्वा च तैलं कटुकं निषिञ्चेत् ५७.३

पक्वं तैलं तै: सपयस्कैस्तिमिरघ्नं ६०.३

पथ्यां तृतीयामथ दाडिमं वा २९.२

पथ्याक्षधात्रीफलमध्यबीजै:- ४६.१

परिश्रमस्वेदविदाहराग- ९१.१

परीक्ष्य हेत्वामयलक्षणानि २.१

पाठा तिक्ता तेजनी पीतिका च ५६.२
पाण्ड्वामये दूरगतेऽपि शस्तः ३०.४
पानाहारविहारभेषजमिदं वातं प्रशान्तिं नयेत् ९६.४
पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत् ९८.४
पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत् ९७.४
पारुष्य-सङ्कोचन-तोद-शूल- ९०.१
पाषाणभित्त्रिकटमूलकृतः कषायः १९.२
पाषाणभिद्धन्वयवासकानाम् १६.२
पिण्डीतकृष्णाबिडधूमकुष्ठैः ४४.२
पित्तं तथा मधुरतिक्तकषायशीतैः १०१.२
पित्तं प्रकोपमुपयाति घनात्यये च ८७.४
पित्तस्य कर्माणि विदन्ति तज्ज्ञाः ९१.४
पित्तस्य वर्षान्तनिदाघयोश्च १००.२
पित्तासृक्प्रभवेषु सर्वतिमिरेषूर्ध्वेषु च व्याधिषु ५९.४
पिबेज्जलेन क्वथितां समांशाम् ११.२
पिबेत् कषायं मधुसम्प्रयुक्तं ९.३
पिबेत् समूत्रा महिषाक्षयुक्ताः १२.२
पिष्टैस्तु माक्षिकरसेन रसक्रियेयं ५०.३
पुनर्नवादार्वभयागुडूचीः १२.१
पुष्पाह्वाघनबिल्वकुष्ठफलिनीकृष्णावचाकल्कितो ८२.३
पुष्पाख्य-ताक्ष्र्यज-सितोदधिफेनसर्ज- ५०.१
पुष्पोद्भूतं यच्च बृहत्यास्तगरञ्च ६०.२
पूतीकपत्र-गजचिर्भिट-चव्य-वह्नि- २२.१
पेयं तथा यवरसेन च विड्-विबन्धे २०.४
पेयं पुराणज्वरकासशूल- ४०.३

प्रत्येकपक्वमनुवासनमीरणघ्नम्	८३.५
प्रपिबन्निदं जयति कुष्ठमातुर:	४२.४
प्रमदानां प्रियतां च गच्छति	७७.४
प्रयोजयेदञ्जन-पान-नावनै:	६४.३
प्रलापमूर्छाभ्रमदाहशोष-	६.३
प्रलापमूर्छाभ्रमपीतभावान्	९१.३
प्रलिहन् क्षीरमनु प्रयोजयेत्	७७.२
प्राप्तं मया पुण्यमनुत्तमं यत्	१०३.२
प्रियङ्गुकाशाबरलोध्रचन्दनै:	६२.२
फलत्रिकं दारुनिशां विशालां	९.१
बदरकटुफलत्रिकाकाण्डदारुकृमिघ्नाजगन्धामरा-	७२.२
बहि: प्रलेपं नयनस्य कुर्यात्	४७.३
बालेषु योज्यावतिसारितेषु	७४.४
बुद्ध्वैतदन्यदपि यद्यदनुक्तमत्र	१०२.१
बिल्वं च पुष्पाणि च धातकीनां	७४.१
भवन्ति युक्तान्यमृतोपमानि	२.४
भवन्ति सिध्मानि यथा न	३५.३
भवेज्जराव्याधिविनाशनी च	७८.४
भार्ङ्गी: सपुष्करजटा लवणानि पञ्च	२३.२
भागोत्तरं चूर्णितमेतदिष्टं	२१.३
भुञ्जीत मन्दाग्निरपि प्रभूतम्	२८.४
भूतरावाह्वयं पानतस्तद् ग्रहघ्नं प्रसिद्धं परम्	७१.४
भूनिम्बवासाकटुरोहिणीनाम्	८.२
भूयस्तथेदमुद्वर्त्तनकं करोति	३५.४
भ्रूकर्णशङ्खाक्षिशिरोऽर्द्धशूले	४५.३

मक्ष्णोर्जयेत् कष्टमपि प्रकोपम् ४६.४

मधुकं मधुना घृतेन च ७७.१

मनश्शिलामागधिकोषणानां ३२.१

मन्दानलत्वे सततामताया- ११.३

मभ्यञ्जनाच्छीतविदाहजित् स्यात् ३९.४

मभ्यञ्जनेन सकृदुद्धरति प्रसह्य ३८.४

मयूरपित्तेन च तण्डुलीयं ६६.१

मांसी-चन्दन-शङ्खपत्र-गिरिमृत्तालीस-पुष्पाञ्जनैः ५२.२

मांसीरसैर्गुग्गुलुसैन्धवैश्च ५७.२

मांसीसेव्यालकौन्तीजलजलदशिलारोचनापद्मकेशी- ६८.१

मामानुबन्धे ग्रहणीगदे च ११.४

मार्गद्वयेनापि चिरप्रवृत्तान् १३.३

माषक्वाथयुतः सतैललवणक्षौद्रः ससर्पिर्गुडः ८२.२

मञ्जिष्ठा रजनीद्वयं त्रिकटुकं श्यामावचाहिङ्गु च ६९.२

मञ्जिष्ठाभयसिक्थतुत्थमधुकैर्नक्ताह्वबीजैः समैः ६३.२

मञ्जिष्ठा-मधुकोत्पलोदधिकफ-त्वक्-सेव्य-गोरोचना- ५२.१

मुखस्य पाकं शमयत्युदीर्णम् ५५.४

मुस्ताञ्च निष्क्वाथ्य निशांशकल्कम् ९.२

मुस्ताखुकर्णीफलदारुशिग्रु- १३.१

मुस्ताटरूषकमहौषधधन्वयासैः ३.३

मुस्तोशीररजो यवाः समरिचं सिन्धूद्भवं कट्फलम् ५१.१

मूलानुगां मगधजां त्रिगुणां च शुण्ठीम् २६.२

मैरण्डतैलेन पिबन् कषायम् १७.२

यद्वा गुडेन सहितान्यवलिह्य सम्यग्- १५.३

यवाग्रजं तेजवतीं सपाठां ५४.१

यष्टीकषायो लवणाग्र्ययुक्तः ८०.१
यष्टीतुगासैन्धवपिप्पलीभिः ७८.१
युक्त्या स्वयं समधिगम्य यथानुरूपम् १०२.२
युञ्ज्यात्तद् व्रणदुष्टिषु व्रणरुजास्वर्शस्सु नाडीषु च ६१.३
रक्तस्रावं हन्ति कण्डूरुजश्च ५६.४
रसाञ्जनं तन्दुलकस्य मूलं १८.१
रसाञ्जनं दारुनिशां सकृष्णाम् ५४.२
रसाञ्जनं व्योषयुतं च पिल्लं ४९.३
रामः प्रशान्तिमुपयात्यपतर्पणेन १०१.४
रामान्वितं व्याधिमुदाहरन्ति ९४.४
रास्नाराठफलत्रयामृतलतायुक्पञ्चमूलीबला- ८२.१
रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनं ९८.१
रोगेषु भेषजमनल्पमतिर्विदध्यात् १०२.३
लघ्वन्नसूपौदनतिक्तयूषैः ९५.२
लभतेऽपि च नात्मनः क्षयं ७७.३
लाक्षा-निशा-लोहितयष्टिकाभिः ३९.२
लाजैस्समांशं मधुनावलीढं ३२.३
लिहन् ससर्पिर्मधुभागयुक्तम् ७९.२
लेहं विदध्यान्मधुना शिशूनाम् ७५.२
लेहोऽयं बालवृद्धानिलरुधिरि-कृश-स्त्रीप्रसक्तिक्षतानां ४३.३
वटप्ररोहं मधु कुष्ठमुत्पलं ३३.१
वर्चोविबन्धेषु च नित्यमद्यात् २९.४
वर्त्तिं कराङ्गुष्ठनिभां घृताक्तां ४४.३
वर्षान्ते तत्समश्नन् भवति विपलितो रूपवर्णप्रभावा- ७६.३
वस्तिः काञ्जिकदुग्धमूत्रसहितो वातामयेभ्यो हितः ८२.४

वातात्मके वस्तिमुदाहरन्ति ९९.३
वातोऽम्लतैललवणैर्मधुरान्नपानैः **१०१.१**
वायुः प्रकोपमुपयाति घनागमे च ८६.४
वासा-गुडूची-चतुरङ्गुलाना- **१७.१**
वासानिम्बपटोलपर्पटफलश्रीमुस्तदार्व्यम्बुदै- **५८.१**
वासामुष्ककपाटलासलवणान् दग्ध्वा रसं पाचितं २४.३
विण्माक्षिकाणां च निहन्ति हिक्काम् ३४.४
विदग्धवैद्यप्रतिपूजितस्य १.३
विपाच्य तैलं पयसा प्रयोजयेत् ६२.३
विपाच्य मूत्राम्लमधूनि दन्ती- **४४.१**
विमोहितानामपि सर्पदंशिनाम् ६४.४
विरूक्षण-स्वेदन-पाचनैश्च ९५.३
विरेचनं पित्तभवे विकारे ९९.२
विरेचनं सोरुबुतैलमेत- ८१.३
विषाणि सस्थावरजङ्गमानि ६७.४
विषाण्यसौ स्थावरजङ्गमानि ६६.३
वृषखदिरपटोलनिम्बपत्र- **४१.१**
वृष्यः स्थिरः शान्तविकारदुःखः ७९.३
वैगन्ध्यसंक्लेदविपाककोपान् ९१.२
वैस्वर्यपीनसकफारुचिषु प्रशस्तम् २५.४
व्याघ्री-किंशुक-पारिभद्रकजटापामार्ग-नीपाग्निकान् २४.२
व्यायामयानकटुतिक्तकषायरूक्षैः ८६.२
व्योषं च संस्तरचितं लवणोपधानम् २२.२
व्योषैर्गुडांशैर्गुडकान् प्रकुर्यात् २८.२
शस्तं छागलमूत्रपिष्टमगदं सर्वग्रहोच्चाटनं ६९.३

शास्त्रं हि किञ्चिदुपदेशबलं करोति	१०२.४
शिरीषपुष्पस्वरसेन भावितं	६४.१
शिरोऽक्षिरोगश्रवणामयेषु	८४.४
शुक्लैरण्डान्मूलमथोग्रा शतपुष्पा	६०.१
शुण्ठ्यम्बुना कफसमीरणसम्भवासु	२०.२
शुण्ठीं समुस्तातिविषां गुडूचीं	११.१
शुण्ठी-कणा-मरिच-नागदल-त्वगेलं	२७.१
शृङ्गी च यष्टीमधुकं च तुल्यम्	७३.२
शृङ्गीं सकृष्णातिविषां विचूर्ण्य	७५.१
शृङ्गीकटुत्रिक-फलत्रय-कण्टकारी-	२३.१
श्चिकित्सिताद्विप्रसृतस्य दूरम्	१.२
श्यामत्व-पाण्डुत्वमथाङ्गपीडा:	९०.२
श्रेष्ठो गलव्याधिषु सर्वजेषु	५३.४
श्रोण्यंस-मेढ्र-हृदय-स्तनरुक्षु पेय:	१९.४
श्लेष्मा प्रकोपमुपयाति तथा वसन्ते	८८.४
श्लेष्मापि तिक्तकटुरूक्षकषायतीक्ष्णै-	१०१.३
श्वासं च भार्गी सह नागरेण	१८.४
श्वासं प्रवृद्धं प्रबलं च कासम्	३१.४
श्वासाग्निमान्द्यग्रहणीगदेषु	४०.४
श्वासाग्निमान्द्यार्दितपीनसेषु	७.४
श्वासोर्ध्ववातकसनारुचिपीनसेषु	२३.४
श्वेतत्वशीततत्वगुरुत्वकण्डू-	९२.१
सञ्ज्ञान्तरं येन तु सम्प्रयान्ति	९३.४
संख्यानसञ्ज्ञातिगताननेकान्	८९.४
संशोधनैरूर्ध्वमधस्तथा च	९५.४

संसर्गजे तु व्यतिमिश्रमेतत्	९९.४
सक्षारहिङ्गुलवणोरुबुतैलमिश्रः	१९.३
सक्षौद्रमेतद् वमनं प्रयोज्यं	८०.३
सगैरिकैः स्वच्छजलेन पिष्टैः	४७.२
सद्योद्भवं वायुरिवाभ्रवृन्दम्	६५.४
सन्धारणाध्यशनजागरणोच्चभाष्य-	८६.१
समाः शतं जीवति कृष्णकेशः	७९.४
समाक्षिका सा वदने विधारिता	३३.३
समाक्षिकां चातिविषामथैकाम्	७५.४
सर्पिः सिद्धमथोर्ध्वजत्रुविकृतिघ्राणाक्षिशूलादिषु	५८.३
सर्पिः सिद्धमनेन सूक्ष्मवदना मर्माश्रिताः स्राविणो	६३.३
सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं	९७.३
सर्पिर्गुडूचीवृषकण्टकारी-	४०.१
सर्वप्रमेहेषु समुत्थितेषु	९.४
सर्वाक्षिरोगप्रशमार्थमेतम्	४७.४
सर्वातिसारेषु च सर्वदेष्टः	७३.४
सर्वामयानामपि नैकनाम्नाम्	९३.२
सलाजचूर्णं गुटिकां प्रकल्पयेत्	३३.२
सर्वैः समं माक्षिकधातुचूर्णम्	३०.२
सर्वैरेव समांशमनञ्जनमिदं शस्तं सदा चक्षुषोः	५२.३
सवत्सकः सातिविषः सबिल्वः	१०.१
सवाजिगन्धोऽन्विततण्डुलीयः	६७.२
सशर्करं कुंकुममाज्यभृष्टं	४५.१
सशर्कराभिस्त्रिफला प्रयुक्ता	७८.२
सशर्करे साश्मरिमूत्रकृच्छ्रे	१४.४

सश्वासकासारुचिपार्श्वरुक्करे	४.३
ससैन्धवं लोध्रमथाज्यभृष्टं	४८.१
ससैन्धवां मागधिकामथो वा	८४.२
सामे सशूले कफवातयुक्ते	५.३
सामे सशूले च सशोणिते च	१०.३
सितलशुनफलत्रिकोशीरतिक्तावचा-	७१.२
सिद्धं पयोदधितुषोदकमस्तुचुक्रैः	८३.२
सिद्ध्यर्थं विनिगदिता भिषग्वराणाम्	८५.२
सिद्धार्थत्रिफलाशिरीषकटभीश्वेताकरञ्जामरं	६९.१
सिन्दूर-गुग्गुलु-रसाञ्जन-सिक्थ-तुत्थैः-	३८.१
सिन्धूत्थ-गैरिक-शिला-मरिचैः समांशैः	५०.२
सिन्धूत्थहिङ्गुत्रिफलायवानी-	२८.१
सुप्तत्व-शीतत्व-खरत्व-शोषान्	९०.३
सुवर्चिका-नागर-कुष्ठ-मूर्वा-	३९.१
सोदीच्यमुस्तश्च कृतः कषायः	१०.२
सोपद्रवाण्यप्यचिरेण हन्ति	६६.४
सौवीरपिष्टं सितवस्त्रबद्धम्	४८.२
सौवीरपिष्टश्च तदासुतश्च	३५.२
सौवीर-शुक्तार्द्रक-मातुलुङ्ग-	५७.१
स्कन्दोन्मादपिशाचराक्षससुरावेशज्वरघ्नः स्मृतः	७०.४
स्तन्येन वालक्तरसेन वापि	३४.३
स्तिक्तोशीरदुरालभा-त्रिकटुक-त्रायन्तिकाचन्दनैः	५८.२
स्त्रीसेवाध्वनियुद्धजागरजलक्रीडापदाघातनम्	९८.२
स्त्वग्वांशीवृकदंशविट्तुषवचाकेशाहिनिर्मोचनैः	७०.२
स्थौल्यप्रसेकोर्ध्वकफामयेषु	१२.४

स्नानाभ्यञ्जनबस्तिमांसमदिरासंवाहनोन्मर्दनम् ९६.२
स्निग्धातितृप्तिलवणोदकपानभक्षैः ८८.३
स्निग्धोष्णस्थिरवृष्यबल्यलवणस्वाद्वम्लतैलातप- **९६.१**
स्नेहस्वेदनिरूहनस्यशयनस्थानोपनाहादिकं ९६.३
स्नेहोपदेहस्तिमितत्वलेपान् ९२.२
स्पृक्काचण्डाहरिद्रागदसितपलितासृग्लतापद्मकैलाः ६८.२
स्वप्नाद्दिवामधुरशीतलमत्स्यमांसैः- **८८.१**
हन्त्यन्धतां च तिमिरार्जुनवर्त्मरोगान् ५०.४
हन्त्यर्जुनं शर्करयाब्धिफेनो **४९.१**
हरीतकी-गोक्षुर-राजवृक्ष- **१६.१**
हरीतकी-नागरमुस्तचूर्णैः- **३१.१**
हरीतकी-पुष्करमूल-कुष्ठम् २१.२
हरीतकीभिः क्वथितं सुवीरं **८१.१**
हरीतकीभिः क्वथितः कषायः ५.२
हरीतकी-सैन्धव-तार्क्ष्यशैलैः **४७.१**
हिंगूग्रगन्धा-विड-शुण्ठ्यजाजी- **२१.१**
हिंग्वादिप्रतिवापमेतदुचितं गुल्मोदराष्ठीलिषु २४.४
हेमन्तवर्षाशिशिरेषु वायोः **१००.१**
हृत्पार्श्वपृष्ठजठरार्त्तिविषूचिकासु २०.३

।। इति योगशत-श्लोकचरणानुक्रमणिका ।।

परिशष्ट- ७.

सन्दर्भग्रन्थ-सूची

अष्टाङ्गहृदयम्- (वाग्भट), सम्पादक- पं. हरि सदाशिव शास्त्री पराडकर, चौखम्भा संस्कृत संस्थान, वाराणसी- १. पुनर्मुद्रण वि.सं. २०६७.

अष्टाङ्गसंग्रहः- (वाग्भट), अनुवादक- अत्रिदेव गुप्त, चौखम्भा कृष्णादास अकादमी, गोपाल मन्दिर लेन, वाराणसी, पुनर्मुद्रित २००५. ई.

कैयदेव-निघण्टुः- सम्पादक/अनुवादक- प्रियव्रत शर्मा, चौखम्भा ओरियण्टालिया, गोकुल भवन, के.३७/१०९, गोपाल मन्दिर लेन, वाराणसी-१, पुनर्मुद्रित २००९. ई.

गदनिग्रह (सोढल-विरचित– सम्पादक- इन्द्रदेव त्रिपाठी, चौखम्भा संस्कृत संस्थान, वाराणसी-१, पुनर्मुद्रण-२०११ ई.

चक्रदत्तः- (चक्रपाणिदत्त), सम्पादक- इन्द्रदेव त्रिपाठी, चौखम्भा संस्कृत भवन, वाराणसी-१, पुनर्मुद्रण-२०११ ई.

चक्रदत्त-रत्नप्रभा-(निश्चलकर), सम्पादक- प्रियव्रत शर्मा, स्वामी जयरामदास, रामप्रकाश ट्रस्ट, अनाज मण्डी जौहरी बाजार, जयपुर-३०२००३. प्रथम संस्करण- १९९३ ई.

चरकसंहिता- सम्पादक- त्रिविक्रमात्मज यादवशर्मा, चौखम्भा ओरियण्टालिया, बंग्लो रोड़, ९- यू.बी. जवाहरनगर, दिल्ली-७, प्रथम संस्करण-२००४ई.

धन्वन्तरिनिघण्टु- सम्पादक- आचार्य प्रियव्रत शर्मा, चौखम्भा ओरियण्टालिया, गोकुल भवन, गोपाल मन्दिर लेन, वाराणसी- १, पुनर्मुद्रित संस्करण- २००८ ई.

भैषज्यरत्नावली (गोविन्ददाससेन-विरचित)- प्रो. सिद्धिनन्दन मिश्र, चौखम्भा सुरभारती प्रकाशन, वाराणसी, संस्करण- २०११ ई.

योगचिन्तामणि (हर्षकीर्त्ति- विरचित)- अनुवादक- कन्हैयालाल पाठक, श्रीवेंकटेश्वर प्रेस, खेमराज श्रीकृष्णदास मार्ग मुम्बई- ४. पुनर्मुद्रण- दिसम्बर २०१३ ई.

योगशतक- सम्पादक- जान फिल्लियोजा, फ्रेंच इन्स्टीट्यूट, पाण्डिचेरी, प्रथम संस्करण १९७९ ई.

योगशतकम्- सम्पादक- एच. पी. मल्लदेवरु, प्राच्यविद्या-संशोधनालय मैसूरु (कर्नाटक), प्रथम संस्करण १९८५ ई.

योगरत्न-समुच्चय-(चन्द्रट-प्रणीत), सम्पादक- आचार्य बालकृष्ण, पतञ्जलि योगपीठ, हरिद्वार- २४९४०२. (प्रकाशनाधीन)

योगरत्न-समुच्चय- (अनन्तकुमार-प्रणीत), प्रथम भाग, सम्पादक- एस. धन्वन्तरिदास सी. एन. नारायणन् मूस, अनन्तशयन राजकीय मुद्रण यन्त्रालय, तिरुवनन्तपुरम् (केरल), प्रथम संस्करण- १९४० ई.

योगरत्न-समुच्चय- (अनन्तकुमार-प्रणीत), द्वितीय भाग, सम्पादक- धन्वन्तरिदास सी. एन. नारायणन् मूस, अनन्तशयन राजकीय मुद्रण यन्त्रालय, तिरुवनन्तपुरम् (केरल), प्रथम संस्करण- १९४० ई.

योगरत्न-समुच्चय- (अनन्तकुमार-प्रणीत), तृतीय भाग, सम्पादक- रामस्वामी शास्त्री, अनन्तशयन राजकीय मुद्रण यन्त्रालय, तिरुवनन्तपुरम् (केरल), प्रथम संस्करण- १९४७ ई.

योगरत्नाकर- (अज्ञातकर्तृक) सम्पादक- कृष्णशर्मा नवरे, निर्णय-सागर मुद्रणालय मुम्बई, संस्करण- १९०७ ई.

वृत्तरत्नाकर- (केदारभट्ट-विरचित), काशिनाथ पाण्डुरङ्ग परब, निर्णयसागर मुद्रणालय मुम्बई, १८९० ई.

शालिग्रामौषधशब्दसागर- शालिग्राम वैश्य, श्रीवेंकटेश्वर प्रेस, खेमराजश्रीकृष्णदास मार्ग, मुम्बई- ४००००४., संस्करण नवम्बर- २००४ ई.

सिद्धसार-संहिता- (रविगुप्त-विरचिता), हिन्दीव्याख्याकार- आचार्य बालकृष्ण, दिव्य प्रकाशन, पतञ्जलि योगपीठ ट्रस्ट, हरिद्वार- २४९४०२, प्रथम संस्करण अगस्त २०१४ ई.

सुश्रुतसंहिता- सम्पादक- त्रिविक्रमात्मज यादवशर्मा, चौखम्भा सुरभारती प्रकाशन, वाराणसी-१; २०१२ ई.

ए हिस्ट्री ऑफ इण्डियन मैडिसन लिट्रेचर- जी. जान म्यूलनबल्ड, जे. गोण्ड फाउन्डेशन, रायल नीदरलैण्ड एकेडमी ऑफ आर्ट एण्ड साइन्स, संस्करण- २००० ई.

शब्दसंक्षेप-सूची

अ.सं.सू.	अष्टांग-संग्रहः, सूत्रस्थानम्
अ.हृ. सू.	अष्टांग-हृदयम्, सूत्रस्थानम्
अ.सं.चि.	अष्टांग-हृदयम्, चिकित्सास्थानम्
अ.सं.उ.	अष्टांग-हृदयम्, उत्तरस्थानम्
कै. नि.	कैयदेव-निघण्टु
च.सं.	चरकसंहिता
प.सं.	पद्यसंख्या
सिद्ध.सं.	सिद्धसार-संहिता
सु. सं.	सुश्रुतसंहिता
देव.	देवनागरी
क्र.	क्रमांक

पाठान्तर-शब्दसंक्षेप-सूची

(योगशत-पद्यों के पाठान्तर-प्रदर्शन में प्रयुक्त संकेत)

१. **अ.**- योगशतम्- प्राच्यविद्या-प्रतिष्ठान अलवर - हस्तलेख क्र. ५२४२.

२. **आ.**- आनन्द आश्रम पुणे से प्राप्त हस्तलेख- प्रथम,

३. **इ.**- इन्स्टीट्यूट फ्रेंच इण्डोलॉजी पाण्डिचेरी से प्रकाशित संस्करण - १९७९ ई.

४. **क.**- यादवराव शर्मा, ग्राम- कन्दकृत्ति, निजामाबाद से प्राप्त हस्तलेख

५. **च-र.**- चक्रदत्त रत्नप्रभा (निश्चलकर-रचित), सम्पादक- आचार्य प्रियव्रत शर्मा, संस्करण- २०५० वि., (स्वामी जयरामदास रामप्रकाश ट्रस्ट, अनाज मण्डी, जौहरी बाजार- ३०२००३)

६. **ज.**- रघुनाथ मन्दिर हस्तलेखागार जम्मू से प्राप्त हस्तलेख (क्रमांक- ३१०६)

७. **जै.१** - जिनभद्रसूरि हस्तलिखित ग्रन्थभण्डार, जैसलमेर दुर्ग (राजस्थान), प्रथम प्रतिलिपि- ग्रन्थांक- २२२८.

८. **ति.**- प्राच्यविद्या संशोधनालय (ओ.आर.आई.), कार्यवट्टम्, तिरुवनन्तपुरम्, केरल विश्वविद्यालय से प्राप्त योगशतम्- क्रमांक-९७४३, अमितप्रभ- (देवनागरी) पत्र- १३, पूर्ण।

९. **ब. ४** - प्राच्यविद्या-मन्दिर बडौदा (गुजरात), हस्तलेख क्रमांक- ९०५९.

१०. **भो.१-८** भो. जे. अध्ययन-संशोधन भवन, आश्रम मार्ग, अहमदाबाद (गुजरात) से प्राप्त हस्तलेख १-८;

११. **मै.**- मैसूर-संस्कण, प्राच्यविद्या-संशोधनालय मैसूर, संस्करण १९८६ ई.;

१०. **रू.**- रूपनयनटीका युक्त हस्तलेख, प्राच्यविद्या-प्रतिष्ठान जोधपुर (राजस्थान) से प्राप्त (क्रमांक-१५६२)

....

शुभ-सम्मति

आचार्य **'अमितप्रभ'** द्वारा ७वीं शती में रचित 'योगशत' नामक पुस्तिका आयुर्वेद की प्राचीन एवं अति महत्त्वपूर्ण रचना है। इसमें ग्रन्थकार ने अपने सुदीर्घ चिकित्सकीय अनुभव एवं आयुर्वेद के गहन अध्ययन के आधार पर लगभग १०० श्लोकों में ही बहुत सरल व सरस शैली में विशाल आयुर्वेद-सागर का सारभूत अमृततत्त्व प्रस्तुत कर दिया है। इसमें संक्षिप्त किन्तु प्रामाणिक रूप से किया गया आयुर्वेदीय चिकित्सा एवं मुख्य सिद्धान्तों का वर्णन बहुत ही सुगम व सर्वजनोपयोगी है। आयुर्वेद-मनीषी **आचार्य श्रीबालकृष्ण जी** ने चिरकाल से उपेक्षित इस ग्रन्थरत्न का अनेक पुरातन हस्तलिखित प्रतियों के आधार पर उत्तम सम्पादन कर पहली बार हिन्दी अनुवाद के साथ प्रकाशन किया है, जो आयुर्वेद-जगत् के लिए विशेष रूप से उपादेय एवं स्पृहणीय है।

इस पुस्तक में आयुर्वेद के काय-चिकित्सा आदि आठों अंगों के अन्तर्गत चिकित्सा हेतु ऐसे उत्तमोत्तम चयनित योग (नुस्खे) प्रस्तुत किए हैं, जो अत्यन्त प्रभावशाली हैं तथा जिन्हें सरलता से ग्रामीण क्षेत्र में ही बनाया जा सकता है। ये योग अति प्राचीन काल से सुपरीक्षित हैं तथा वैद्य-समाज में परम्परागत रूप से प्रचलित एवं सुप्रसिद्ध हैं। हजारों वर्षों से वैद्यजन निरापद रूप से इनके द्वारा चिकित्सा करते आ रहे हैं।

चिकित्सा-विधि के साथ ही इस पुस्तक में स्वस्थ व्यक्ति के स्वास्थ्य-रक्षण हेतु वात, पित्त, कफ के स्वरूप, प्रकोप के कारण एवं प्रशमन के उपायों की जानकारी दी गई है, जो प्रत्येक आरोग्याभिलाषी के लिए अत्यन्त आवश्यक है। इसमें त्रिदोष के शोधन हेतु पञ्चकर्म का भी निरूपण किया है, जो आयुर्वेदीय चिकित्सा-पद्धति का एक महत्त्वपूर्ण एवं प्रभावशाली अंग है।

सामान्य जन भी इस संक्षिप्त एवं सरल पुस्तक को पढ़कर आयुर्वेदीय चिकित्सा-पद्धति एवं सिद्धान्तों से भली-भांति परिचित हो सकते हैं तथा तदनुसार अपने जीवन को स्वस्थ व सुखी बना सकते हैं। **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।** सभी के सुखमय आरोग्य की मंगलकामना के साथ—

आपका
स्वामी रामदेव

दिव्य प्रकाशन
पतञ्जलि योगपीठ
महर्षि दयानन्द ग्राम, दिल्ली-हरिद्वार राष्ट्रीय राजमार्ग
निकट बहादराबाद, हरिद्वार-249402 (उत्तराखण्ड)